In the speech of Urvasi (p. 96), there is a stop after कहइस्सं in the Pandit's edition where इमं दाव पसीददु महाराओ is read as one clause. That this is deliberately done is clear from the Pandit's notes. The learned Pandit feels that this is a strange construction; he, however, attempts to justify it. He suggests that क्षन्तुं should be supplied as governing इमं. This would give us a still stranger idiom इमं दाव क्षन्तुं पसीददु महाराओ which is only an echo of the English idiom which is uppermost in the minds of our Sanskrit scholars. Is it conceivable that Kalidasa should read such a faulty sentence as इमं दाव पसीददु महाराओ. Here पसीददु is an intransitive verb with the object इमं. I have therefore followed the commentator in giving the stop after इमं which refers to वचनार्थम् in the preceding line. This does away with the necessity of supplying क्षन्तुं and gives us a sentence which is in perfect accord with the Sanskrit idiom.

Besides these, I have noticed a few more superior readings. The reader will find them discussed in the foot-notes to pages on which they occur.

## THE COMMENTATORS OF THE VIKRAMORVASIYA.

We know of only two commentators of the Vikramorvasiya—Katayavema and Ranganatha.

Katayavema was a minister of the Reddi prince,

Kumaragiri of Kondavidu about A. D. 1400. In the introductory verses of his commentary on the Sakuntala, he tells us something about himself. From that account we know that the Commentator's name was only Vema (Bhupala) and that Kataya was an ancestor of his. His father was Kata. He has commented on the three dramas of Kalidasa. Although he nowhere tells us that he commented on any other work, we know that he commented on the Amaru-sataka. The Researh Department of the D. A. V. College, Lahore is in possession of a Ms. of Katayavema's Commentary on the said work.

Katayavema is a sound Sanskrit scholar who has a clear judgment. It is noteworthy that Mr. Pandit with all his *apparatus criticus* could not give us a text more improved than we have in Katayavema. It is only at two places when the commentator has failed to give us the superior readings adopted by the Pandit. Impressed by the discretion that the Commentator exercises in the choice of his readings, Mr. Pandit calls him a careful, scrupulous and exact scholar. His commentary is simple and brief. The language is easy throughout. Unnecessary details are conspicuously absent. The commentary is, in all respects, suited to the beginners.

Ranganatha in the concluding verses of his commentary tells us that he wrote this commentary in Vikrama year 1712, *i.e.* A. D. 1656. He was a resident of Vyomakesa-puta-bhedana. His father's name was Balakrsna. He came of the family of Simbekara.

Ranganatha has, unfortunately, a very bad text to comment on. He constantly fights with his bad readings though unsuccessfully. Dissatisfied with his interpretations, he would propose alternatives. But in no case, would he pronounce his judgment upon a reading. His explanations are also fanciful in some cases, but quite good in others. Ranganatha seems to be well-read in rhetoric. But of grammar, he betrays a deplorable ignorance. Only once* he is noticed to quote a Paninean sutra, and there too outrageously misapplies it. His language also is here and there ungrammatical.

---

* कोपः संजातोऽस्येति कुपितः क्रोधवान्। तदस्य सजात—इतीतच्प्रत्ययः – Ranganatha on II. 20.

# DRAMATIS PERSONAE.

1. सूत्रधारः—Stage-manager.
2. पारिपार्श्विकः—Assistant to the stage-manager.
3. पुरूरवस्—The King, the hero of the play.
4. उर्वशी—The heroine.
5. चित्रलेखा—A nymph, a friend of Urvasi.
6. अप्सरसः—Nymphs, friends of Urvasi and Citralekha.
7. रम्भा—One of the companions of Urvasi and Citralekha.
8. चित्ररथः—A King of the Gandharvas.
9. विदूषकः—The court-jester.
10. निपुणिका—A maid of the queen.
11. देवी—The queen.
12. देवदूतः—A messenger from Indra.
13. गालवः }
14. पल्लवः } —Two pupils of the sage Bharata.
15. मेनका—A nymph who played a part in the drama in heaven.
16. कञ्चुकी—The chamberlain.
17. सहजन्या—Citralekha's friend.
18. किराती—A huntress.
19. यवनी—A female attendant.
20. तापसी—A hermit-woman.
21. कुमारः—Prince Ayus, son of Urvasi.
22. नारदः—The sage Narada.

ओंनमः परमात्मने ।

# विक्रमोर्वशीयम् ।

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः॥१॥

विक्रमोर्वशीयव्याख्या कुमारगिरिराजीया ।

वेदादीनां विशुद्धानां विद्यानां जन्महेतवे ।
पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ॥ १ ॥

जयतु विजयलक्ष्मीवल्लभो नित्यकीर्तिः
कुमरगिरिनृपालो[1] राजवेश्याभुजङ्गः ।
बिरुदमसहमानः[2] साभिमानो यदीयं
भवति विमतवर्गो देववेश्याभुजङ्गः ॥ २ ॥

अत्र कविः कालिदासः प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थमिष्ट-देवतास्मरणपूर्वकमाशिषं प्रयुङ्क्ते—वेदान्तेष्वित्यादि । स स्थाणुः[3] शिवः वः युष्माकं निःश्रेयसाय नित्यानन्दाय अस्त्विति सम्बन्धः । सदा तिष्ठतीति स्थाणुः । स्थो णुरित्यौणादिको णुप्रत्ययः । निःश्रेयसमिति अचतुरविचतुरेत्यादिना अच्प्रत्ययान्तं निपातितम् । कीदृशः स्थिरभक्तियोगसुलभः । स्थिरो भक्तियोगो येषां ते तथोक्ताः तैः सुलभः सुखेन प्राप्यः[4] । सुदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् इति खल्प्रत्ययः ।

---

[1] कोमर°—क, ख.

[2] भिरुद°—क, ख. भ्रष्टः पाठः । बिरुद°—ग.

[3] हरे प्रवृत्तस्य स्थाणुपदस्य प्रवृत्तिनिमित्तप्रदर्शनं च—
ततः प्रभृति विश्वात्मा न प्रसूते शुभाः प्रजाः ।
स्थाणुवन्निश्चलो यस्मात्स्थितः स्थाणुरतः स्मृतः ॥ इति
पुराणेषु इति रङ्गनाथः ।

[4] नाथस्तु विधान्तरेण विगृह्णाति यथा—स्थिरा भक्तिः योगो ध्यानं च ताभ्यां सुलभः । स्थिरभक्तिपूर्वकध्यानैकगम्य इत्यर्थः । स्थिरो भक्तियोगो भक्तिप्राप्तिः, तया—सुलभ इति वा । आराध्यत्वेन ज्ञानं भक्तिः इत्युदयनाचार्या इति च नाथः ।

( नान्द्यन्ते )

**सूत्रधारः । नेपथ्याभिमुखमवलोक्य । मारिष इतस्तावत् ।**

---

रोदसी द्यावापृथिव्यौ व्याप्य आक्रम्य स्थितम् । अनेन विभुत्वमुक्तम् । यं स्थाणुं वेदान्तेषु उपनिषद्भागेषु एकपुरुषं एकमद्वितीयं पुरुषमात्मानमाहुः ब्रुवन्ति । ब्रह्मविद इति शेषः । तथा चोक्तं खण्डनकारेण—

**अविकल्पविषय एकः स्थाणुः पुरुषः श्रुतोऽस्ति यः श्रुतिषु ।**
**ईश्वरमुमया न परं वन्देऽनुमयापि तमधिगतम् ॥** इति ।

यस्मिन् स्थाणावीश्वर[1] इत्ययं शब्दः यथार्थाक्षरः अन्वर्थवर्णः । अस्याणिमाद्यैश्वर्य-वत्त्वात्सार्थ इत्यर्थः । तथाविधः सन् अनन्यविषयः न विद्यते अन्यो विषयो वाच्यो यस्य स तथोक्तः । यश्च स्थाणुः नियमितप्राणादिभिः नियमिता निरुद्धाः प्राणादयः पञ्च वायवो यैस्ते तथोक्ताः तैर्मुमुक्षुभिः मोक्षार्थिभिः अन्तः अन्तरङ्गे मृग्यते विचीयते । एष नान्दी[2] श्लोकः । नान्द्यादिसर्वलक्षणं शाकुन्तलव्याख्यान एवोक्तम् । अत्र पदादिनियमोऽपि वेति विकल्पात् पदादिनियमाभावः । अत्र वेदान्तेषु यमाहुरेक-पुरुषमित्यादिभिर्विशेषणैः वक्ष्यमाणः कथानायकः पुरूरवा नाम राजा सूच्यते । कुतः । **उर्वश्यस्यायुरसि पुरूरवा घृतेनाक्ते वृषणं दधाथाम्** (तै० सं० १।३।७।१) इत्यादिवेदवाक्येषु कथितत्वात् । जस्य वा अम्बर अले गई अत्थीत्यादिवाक्य-प्रतीयमानरोदःसञ्चारवत्वाच्च[3] । उर्वश्या मोक्षार्थिभिरप्सरोभिर्मृग्यमाणत्वाच्च ॥

अथ प्रस्तावनां विवक्षुस्तदङ्गयोः प्ररोचनामुखयोः प्रथमं प्ररोचनां प्रस्तौति—नान्द्यन्ते सूत्रधार इत्यादि ।

[5] नेपथ्याभिमुखमवलोक्य मारिष इतस्तावत्—आगम्यतामिति शेषः ।

---

[1] श्रीहरदत्तचरणा अप्याहुः—

**शब्दोयमीश्वर इति श्रुतिगोचरः सन्नानीलकण्ठमवतंसितचन्द्रलेखम् ।**
**त्वामेव बोधयति नाथ निजार्थपोषादन्यं पुनः प्रकरणादिनिपीडनेन ॥**

इति नाथः ।

[2] नान्दीलक्षणं मातृगुप्ताचार्योक्तम्—

**आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः ।**
**नान्दीति कथ्यते................................ ॥ इति नाथः ॥**

[3] अतः परम् अनन्यसाधारणैश्वर्यवत्त्वाच्च इत्यधिकम्—ग, घ.

[4] °र्थिभिर्मृ°—ग. अयमपपाठः । °र्थिनीभिर्मृ°—घ.

[5] नेपथ्यं जवनिकान्तर्भूमिः वेषपरिग्रहस्थलम् । 'अन्तर्जवनिकामङ्गनेपथ्यम्' इति सागरोक्तेः । इति नाथः ।

( प्रविश्य पारिपार्श्विकः )

पारिपार्श्विकः। भाव अयमस्मि।

सूत्रधारः। मारिष बहुशस्तु परिषदा पूर्वेषां कवीनां दृष्टः प्रयोगबन्धः। सोऽहमद्य विक्रमोर्वशीयं नाम नाटकमपूर्वं प्रयोक्ष्ये। तदुच्यतां पात्रवर्गः स्वेषु स्वेषु पाठेष्वसंमूढैर्भवितव्यमिति।

पारि०। यदाज्ञापयति भावः।

[ इति निष्क्रान्तः।

सूत्र०। यावद् इदानीमार्यमिश्रान् विज्ञापयामि।

( प्रणिपत्य )

प्रणयिषु वा दाक्षिण्याद् अथवा सद्वस्तुपुरुषबहुमानात्।
शृणुत मनोभिरवहितैः क्रियामिमां कालिदासस्य ॥२॥

---

मारिषो नाम नटः। नटः सूत्रधारिणा मारिष[1] इत्यामन्त्र्यते। सूत्री नटेन भावेति तेनासौ मारिषेत्युक्तत्वात्। परिपार्श्वं यथा भवति तथा वर्तत इति पारिपार्श्विकः नट इत्यर्थः। परिमुखं चेत्यत्र चकारात् ठक् प्रत्ययः। बहुश इत्यादि। बहुशः अनेकशः बह्वल्पार्थाच्छस्कारकादन्यतरस्यामिति शस् प्रत्ययः। प्रयोगबन्धः प्रयोगः अभिनयः बध्यतेऽस्मिन्निति प्रयोगबन्धो नाट्यम्। अत्र बहुदर्शित्वकथनेन सभा योग्यतरेति तत्प्रशंसा गम्यते।

तावदहमित्यादि—विक्रमोर्वशीयं नाम नाटकं रूपकविशेषम् अपूर्वमभिनवं प्रयोक्ष्ये अभिनेष्यामि। विक्रमं च उर्वशीं चाधिकृत्य कृतं नाटकं विक्रमोर्वशीयम्। शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छ इति छप्रत्ययः। विक्रमशब्दः पुरूरवसः संज्ञेति संप्रदायः। अनेन प्रयोज्यनिवेदनं कृतम्। भरतवर्गः नटवर्गः। स्वेषु स्वेषु पात्रेषु अनुकार्यरूपेषु। असंमूढैरप्रमत्तैः॥

प्रणयिष्वित्यादि। स्वविद्याविशेषं पश्यतेति प्रार्थयमानेष्वस्मास्विति शेषः। दाक्षिण्यात् आदरात्। अथवेति पक्षान्तरे। सद्वस्तुपुरुषबहुमानात् प्रशस्तकथानायकगौरवात्। अवहितैः एकाग्रैर्मनोभिश् चित्तैः उपलक्षिताः कालिदासस्येमां क्रियां कृतिं शृणुत। प्रणयिषु दाक्षिण्यादित्यनेन सभादाक्षिण्यपात्रत्वान्नटानां प्रशंसा

---

[1] उक्तं चान्यत्र—

मान्यो भावः समुद्दिष्टः किञ्चिदूनस्तु मारिषः। इति नाथः।

( नेपथ्ये )

परित्ताअदु परित्ताअदु जो सुर-पक्ख-वादी
परित्रायतां परित्रायतां यः सुरपक्षपाती
जस्य वा अम्बर-तले गदी अत्थि
यस्य वा अम्बरतले गतिः अस्ति

सूत्र० । ( कर्णं दत्त्वा ) अये किं नु खलु मद्विज्ञापनानन्तरं कुररीणामिव आकाशे शब्दः श्रूयते । ( विचिन्त्य ) भवतु ज्ञातम् ।

ऊरूद्भवा नरसखस्य मुनेः सुरस्त्री
कैलासनाथमुपसृत्य निवर्तमाना ।
बन्दीकृता विबुधशत्रुभिरर्धमार्गे
क्रन्दत्यतः शरणमप्सरसां गणोयम् ॥ ३ ॥

[इति निष्क्रान्तः]

॥ इति प्रस्तावना ॥

---

कृता । सद्वस्तुपुरुषबहुमानादित्यनेन वस्तुप्रशंसा कृता । कालिदासस्येत्यनेन महत्त्वोपपादकविशेषणाभावेऽपि प्रसिद्धयैव तस्य माहात्म्यं गम्यते । कालिदासस्य क्रियामित्यनेन तत्संबन्धित्वकथनात्काव्यप्रशंसा कृता ।

ऊरूद्भवेत्यादि । नरसखस्य नारायणस्य मुनेः ऊरूद्भवा सुरस्त्री उर्वशी कैलासनाथं कुबेरम् उपसृत्य सेवित्वा निवर्तमाना प्रत्यागच्छन्ती अर्धमार्गे मार्गस्यार्धं अर्धमार्गः तस्मिन् । अर्धं नपुंसकम् इत्येकदेशिसमासः । विबुधशत्रुभिरसुरैः बन्दीकृता बलात्कारेण गृहीता । अतः अस्मात्कारणात् अयमप्सरसां गणः करुणं[1] दुःखं यथा तथा क्रन्दति आक्रोशति । अनेन पात्राक्षेपहेतुः प्रयोगातिशयो[2] नामामुखाङ्गमुक्तं भवति ।

---

[1] करुणमिति काटयवेमधृतः पाठः । मूले तु प्रशस्तकोषप्रामाण्याद् अर्थसामञ्जस्याच्च शरणमिति परिगृहीतम् ।

[2] यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते ।
तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ॥

( ततः प्रविशन्ति अप्सरसः )

सर्वाः । परित्ताअदु परित्ताअदु जो सुरपक्ख-वादी
परित्रायतां परित्रायतां यः सुरपक्षपाती
जस्स वा अम्बर-अले गदी अत्थि ।
यस्य वा अम्बरतले गतिः अस्ति ।

( ततः प्रविशति राजा रथेन सूतश्च )

राजा । अलमलमाक्रन्दितेन । सूर्योपस्थानात् प्रतिनिवृत्तं पुरूरवसं मामुपेत्य कथ्यतां कुतो भवत्यः परित्रातव्या इति ।

रम्भा । असुरावलेवादो ।
असुरावलेपात् ।

राजा । किं पुनरसुरावलेपेन भवतीनामपराद्धम् । भावे क्तः

मेनका । सुणादु महाराओ । जा तवो-विसेस-परिसङ्किदस्स
शृणोतु महाराजः । या तपोविशेषपरिशङ्कितस्य
सुउमारं प्रहरणं महिन्दस्स । पच्चादेसो रूव-गव्विदाए
सुकुमारं प्रहरणं महेन्द्रस्य । प्रत्यादेशो रूपगर्विताया:
सिरीए । अलङ्कारो सग्गस्स । सा णो पिअसही उव्वसी
श्रियः । अलङ्कारः स्वर्गस्य । सा नः प्रियसखी उर्वशी
कुबेर-भवणादो पडिणिवट्टमाणा समावत्तिदिट्ठेण हिरण्णउर-
कुबेरभवनात् प्रतिनिवर्तमाना समापत्तिदृष्टेन हिरण्यपुर-
वासिणा केसिणा दाणवेण चित्तलेहा-दुदीआ अद्धपथं
वासिना केशिना दानवेन चित्रलेखा-द्वितीया अर्धपथ
ज्जेव्व बन्दी-ग्गाहं गहिदा ।
एव बन्दीग्राहं गृहीता ।

राजा । अपि ज्ञायते कतमेन दिग्भागेन गतः स जाल्म इति ।

---

अथाङ्कः प्रस्तूयते—

ततः प्रविशतीत्यादि । अङ्कलक्षणं चोक्तं शाकुन्तलव्याख्याने । असुरावलेपेन भवतीनाम् असुराणां दैत्यानां अवलेपेन दर्पेण किमपराद्धम् अपराधः कः । बन्दीग्राहं गृहीता बन्दीव गृहीता । उपमाने कर्मणीति णमुल् कषादित्वादनुप्रयोगः । जाल्मः असमीक्ष्यकारी ।

[१] दाणवाहिवेण—टीका.

सहजन्या । पुव्वुत्तेरण ।

पूर्वोत्तरेण ।

राजा । तेन हि विमुच्यतां विषादः । यतिष्ये वः सखी-प्रत्यानयनाय ।

रम्भा । सरिसं खु सोमादो एक्कन्दरस्स ।

सदृशं खलु सोमाद् एकान्तरस्य ।

राजा । क्व पुनर्मां भवत्यः प्रतिपालयिष्यन्ति ।

सर्वाः । इमस्सिं हेमकूड-सिहरे ।

एतास्मिन् हेमकूटशिखरे ।

राजा । सूत ऐशानीं दिशं प्रति चोदयाश्वान् आशुगमनाय ।

सूतः । यद् आज्ञापयत्यायुष्मान् ।

( इति यथोक्तं करोति )

राजा । ( रथवेगं निरूपयन् ) । साधु साधु अनेन रथवेगेन पूर्वप्रस्थितं वैनतेयमप्यासादयेयं किं पुनस्तमपकारिणं मघोनः ।

तथाहि—

अग्रे यान्ति रथस्य रेणुवदमी चूर्णीभवन्तो घनाश्
चक्रभ्रान्तिररान्तरेषु जनयत्यन्यामिवारावलिम् ।
चित्रन्यस्तमिवाचलं हयशिरस्यायामवच्चामरम्
यष्ट्यग्रे च समं स्थितो ध्वजपटः प्रान्ते च वेगानिलात् ।४।

[ इति निष्क्रान्तो रथेन राजा सूतश्च ]

---

पूर्वोत्तरेण, पूर्वस्या उत्तरस्याश्च दिशोर्यदन्तरालं स दिग्विभागः पूर्वोत्तरः तेन दिङ्-नामान्यन्तराले इति बहुव्रीहिसमासः । एकः बुधः अन्तरं व्यवधानं यस्य स तथोक्तः तस्य ।

अग्रे यान्तीत्यादि । चूर्णीभवन्तः कणाः सन्तः घनाः मेघाः रथस्याग्रे रेणुवत् रजांसीव यान्ति । चक्रभ्रान्तिः चक्रस्य रथाङ्गस्य भ्रमणं अरान्तरेषु अराणां नेम्यवष्टम्भकदण्डाकारवक्रावयवानाम् अन्तराणि अन्तरालानि तेषु अन्यामरावलिं जनयतीव । हयशिरसि चामरं प्रकीर्णकं आयामवत् दैर्घ्यवत् अचलं निष्कम्पं सत् चित्रन्यस्तमिव आलेख्यनिवेशितमिव । स्थितमिति शेषः । ध्वजपटः यष्ट्यग्रे दण्डाग्रे च प्रान्ते च अन्ते च समं अविषमं एकप्रकारमित्यर्थः । वेगानिलात् वेगस्यानिलो वायुः तस्मात् । वेगानिलादिति सर्वत्र सम्बन्धनीयम् ॥

रम्भा । हला जह-णिद्दिट्ठं पदेसं संकमामो ।
सखि यथानिर्दिष्टं प्रदेशं संक्रामामः[१] ।
( शेषास्तथेति शैलाधिरोहणं रूपयित्वा स्थिताः )

रम्भा । अवि णाम सो राएसी समुध्धरे णो हिअअ-सल्लं ।
अपि नाम स राजर्षिः समुद्धरेद् नो हृदयशल्यम् ।

मेन० । मा दे संसओ होदु । उवट्ठिद-संपराओ महिन्दो
मा तव संशयो भूत् । उपस्थितसंपरायो महेन्द्रो
मझ्झम-लोआदो सबहुमाणं आणाविअ तं एव्व विअ-असेणामुहे
मध्यमलोकात् सबहुमानं आनाय्य तमेव विजयसेनामुखे
णिओजेदि
नियोजयति

रम्भा । सव्वहा इह विअई भोदु
सर्वथा इह विजयी भवतु

सह० । ( क्षणमात्रं स्थित्वा ) । हला समस्ससध समस्ससध
हला समाश्वसित समाश्वसित
एसो उच्चलिद-हरिण-केदणो तस्स राएसिणो
एष उच्चलित-हरिण-केतनः तस्य राजर्षेः
सोमदत्तो रहो दीसदि । ण खु सो अकिदथ्थो
सोमदत्तो रथो दृश्यते । न खलु सः अकृतार्थो
णिवत्तिस्सदि ।
निवर्तिष्यते ।

( सर्वा उच्चक्षुषो विलोकयन्ति )

(ततः प्रविशति राजा सूतश्च चित्रलेखावलम्बितहस्ता भयनिमीलिताक्षी चोर्वशी)

चित्रलेखा । समस्ससदु समस्ससदु पिअ-सही ।
समाश्वसितु समाश्वसितु प्रियसखी

---

सख्यौ यथानिर्दिष्टप्रदेशं संक्रामामः । ननु उपस्थितसांपरायो महेन्द्रोऽपि मध्यमलोकात् सबहुमानमानीय तमेव विजयसेनामुखे नियोजयति

---

१ संक्रमामहे इति पाण्डुरङ्गधृतः पाठो मूलकोषगतः स च न समीचीन इति काटयवेमेनाङ्गीकृतः पाठ एवोपात्तः ।

राजा । सुन्दरि समाश्वसिहि समाश्वसिहि ।

गतं भयं भीरु सुरारिसंभवं
त्रिलोकरक्षी महिमा हि वज्रिणः ।
तदेतदुन्मीलय चक्षुरायतं
महोत्पलं प्रत्युषसीव पद्मिनी ॥५॥

चित्र० । अम्हहे कहं उस्ससिद–मत्ते–जीविदा अज्जवि सण्णं
अहो कथम् उच्छ्वसितमात्रजीविता अद्यापि संज्ञां
ण पडिवज्जदि ।
न प्रतिपद्यते ।

राजा । बलवदु अत्रभवती परित्रस्ता । तथाहि

मुञ्चति न तावदस्याः कम्पं
कुसुमसमबन्धनं हृदयम् ।
पश्य हरिचन्दनेन स्तन-
मध्योच्छ्वासिना कथितम् ॥६॥

चित्र० । हला पज्जवत्थावेहि अत्ताणं । अणच्छरा विअ
सखि पर्यवस्थापय आत्मानम् । अनप्सरेव
मे पडिहासि ।
मम प्रतिभासि ।

( उर्वशी प्रत्यागच्छति )

राजा । अयि प्रकृतिमापद्यते ते सखी । पश्य

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-
नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा ।

---

गतं भयमित्यादिः स्पष्टोऽर्थः । मुञ्चति न तावदित्यादिः स्पष्टोऽर्थः । प्रत्यागच्छति संज्ञां लभते ।

आविर्भूत इत्यादि । शशिनि चन्द्रे आविर्भूते प्रकाशिते सति तमसा तिमिरेण मुच्यमाना रात्रिरिव नैशस्य निशासंबन्धिनः हुतभुजः अग्नेः छिन्नभूयिष्ठधूमा छिन्नः विच्छिन्नः भूयिष्ठः बहुलः धूमो यस्याः सा तथोक्ता । अर्चिरिव ज्वालेव,

मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गा रोधःपतनकलुषा गृह्णतीव प्रसादम् ॥७॥

चित्र० । सहि विस्सध्धा होहि । पराभूदा खु तिदस-परि-
सखि विश्रब्धा भव । पराभूताः खलु त्रिदशपरि-
पन्थिणो हदासा ।
पन्थिनो हताशाः ।

उर्वशी । ( चक्षुषी उन्मील्य ) । किं पहावदंसिणा महिन्देण !
किं प्रभावदर्शिना महेन्द्रेण ।

चित्र० । ण महिन्देण । महिन्द सरिसाणुभावेण इमिणा राएसिणा
न महेन्द्रेण । महेन्द्रसदृशानुभावेन अनेन राजर्षिणा ।

उर्वशी । (राजानं विलोक्य । आत्मगतम् ) उवकिदं खु दाणवेहिं ।
उपकृतं खलु दानवैः ।

राजा । ( प्रकृतिस्थामुर्वशीं निर्वर्ण्य । स्वगतम् ) । स्थाने खलु ।
नारायणमूर्षिं विलोभयन्त्यस्तदूरुसंभवामिमां दृष्ट्वा व्रीडिताः
सर्वा अप्सरस इति । अथवा नेयं तपस्विनः सृष्टिर्भवितुमर्हति ।
तथा हि—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तप्रभः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।

---

रोधःपतनकलुषा रोधसस्तटस्य पतनेन कलुषा आविला भूत्वा प्रसादं प्रसन्नतां गृह्णती उपाददाना गङ्गेव इयं वरतनुः अन्तः हृदये मोहेन मूर्च्छया मुक्तकल्पा मुक्तदेश्या । ईषदसमाप्तौ कल्पब्देश्यदेशीयर इति कल्पप् प्रत्ययः । लक्ष्यते ॥७॥

प्रभावं माहात्म्यं दर्शयति प्रकाशयतीति स तथोक्तः तेन महेन्द्रेण । उपकृतं खलु मे दानवैः । अत्र उर्वश्या अभिलाषो गम्यते । अयमभिलाषः प्रथमावस्थेति मन्तव्यम् । प्रकृतिस्थामुर्वशीं विलोक्यात्मगतमित्यादिना गम्यमानो राजाभिलाषोऽस्मिन्नाटके बीजमित्यनुसन्धेयम् । अयमेवाभिलाषो राज्ञः प्रथमावस्थेत्यनुसन्धेयम् ।

अस्याः सर्ग इत्यादि । अस्याः उर्वश्याः सर्गविधौ निर्माणकर्मणि प्रजापतिर्विधाता कान्तिप्रदश्चन्द्रोऽभून्नु । अनेन उर्वश्याः कान्त्यतिशयो गम्यते । अथवा शृङ्गारैकरसः शृङ्गारः एकः केवलो रसो यस्य स तथोक्तः मदनः स्वयं प्रजापतिरभून्नु ।

---

१ कान्तिप्रदः—टीकापाठः । एवमेव काव्यप्रकाशकाराः ।

वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ ८ ॥

उर्वशी । हला सो सहीजणो कहिं खु भवे ।
सखि स सखीजनः क्व खलु भवेत् ।

चित्र० । महाराओ अभअ-दाई जाणादि ।
महाराजः अभयदायी जानाति ।

राजा । ( उर्वशीमवलोकयन् ) । महति विषादे वर्तते । पश्यतु भवती ।

यदृच्छया त्वं सकृदप्यवन्ध्ययोः
पथि स्थिता सुन्दरि यस्य नेत्रयोः ।
त्वया विना सोपि समुत्सुको भवेत्
सखीजनस्ते किमुतार्द्रसौहृदः ॥ ९ ॥

उर्वशी । ( अपवार्य ) । अहिजादं खु से वअणं । अहवा
अभिजातं खलु अस्य वचनम् । अथवा
चन्दादो अमिअंति किं एत्थ अच्चरिअं । ( प्रकाशम् ) ।
चन्द्राद् अमृतम् इति किम् अत्र आश्चर्यम् ।

---

अनेनास्याः सौभाग्यातिशयो गम्यते। अथवा पुष्पाकरो मासः वसन्तः प्रजापतिरभून्नु। अनेनास्याः सौकुमार्यातिशयो गम्यते। मुख्यस्रष्टारं नारायणमपह्नुत्य किमर्थमेवं वितर्कितमित्याशङ्क्य एवंविधरूपनिर्माणे तस्यासामर्थ्यं दर्शयति—वेदाभ्यासेत्यादि। वेदाभ्यासजडः वेदाभ्यासेन जडः मन्दः। मलिन इत्यर्थः। विषयव्यावृत्तकौतूहलः विषयेभ्यः शब्दादिभ्यः व्यावृत्तं कौतूहलं यस्य स तथोक्तः। रसानभिज्ञ इत्यर्थः। पुराणो जीर्णः सौकुमार्यादिरहितः, मुनिस्तपस्वी नारायणः, मनोहरं हृद्यम् इदं रूपं निर्मातुं स्रष्टुं कथं नु प्रभवेत्। कथं न्वित्याक्षेपे। न प्रभवेदित्यर्थः। मनोहरमिदं रूपमित्यनेन द्योत्यमानस्य राजाभिलाषस्य बीजस्य विन्यासादुपक्षेपो नाम सन्ध्यङ्गमुक्तं भवति ॥८॥

यदृच्छयेत्यादि। त्वया विना सोऽपि समुत्सुको भवेदिति सामान्योक्त्या आत्मनि प्रतीयमानमौत्सुक्यमारम्भो नाम प्रथमावस्थेति मन्तव्यम्। अत्र बीजारम्भयोः समन्वयान्मुखसन्धिरिति मन्तव्यम् ९॥

अभिजातं खलु अस्य वचनम्, अथवा चन्द्रादमृतमिति किमत्राश्चर्यम्।

अदो एव्व णं पेक्खिदुं तुवरदि मे हिअअं ।
अत एव एनं प्रेक्षितुं त्वरते मे हृदयम् ।

राजा । ( हस्तेन दर्शयन् ) ।

एताः सुतनु मुखं ते सख्यः पश्यन्ति हेमकूटगताः ।
प्रत्यागतप्रसादं चन्द्रमिवोपप्लवान्मुक्तम् ॥१०॥

चित्र० । हेला पेक्ख ।
सखि पश्य ।

उर्व० । (राजानं सस्पृहं पश्यन्ती) । समदुक्खो पिवइ व्व मं णयणेहिं ।
समदुःखः पिबतीव मां नयनैः ।

चित्र० । ( साकूतम् ) अयि को ।
अयि कः ।

उर्व० । सहि-अणो ।
सखीजनः ।

रम्भा । (सहर्षम्) । एसो चित्तलेहा-दुदीअं उव्वसिं गेण्हिअ
एष चित्रलेखाद्वितीयाम् उर्वशीं गृहीत्वा
विसाहा-समीवगदो विअ चन्दो उवट्ठिदो राएसी ।
विशाखासमीपगत इव चन्द्र उपस्थितो राजर्षिः ।

मेन० । (निर्वर्ण्य) । दुवेवि णो पिआणि उवणदाणि । इअं
द्वे अप्यस्माकं प्रिये उपनते । इयं
पच्चाणीदा सही अअं च अपरिक्खदो महाराओत्ति ।
प्रत्यानीता सखी अयं च अपरिक्षतो महाराज इति ।

सह० । सुट्ठु भणासि । दुज्जआ खु दाणवा ।
सुष्ठु भणसि । दुर्जयाः खलु दानवाः ।

राजा । सूत इदं तच्छैलशिखरम् । अवतार्यतां रथः ।

सूतः । यद् आज्ञापयत्यायुष्मान् । (इति यथोक्तं करोति)

---

अत एवैनं सखीजनं द्रष्टुं त्वरते मे हृदयम् ।

एताः सुतन्वित्यादि । स्पष्टोऽर्थः । द्वे अपि नः प्रिये उपनते इयं प्रत्यानीता प्रियसखी, अयं चापरिक्षतो महाराज इति ।

राजा । (चक्रोद्घातं रूपयित्वा । आत्मगतम्) हन्त दत्तफलो मे विषमावतारः ।

यदयं रथसंक्षोभादंसेनांसो रथोपमश्रोण्याः ।
स्पृष्टः सरोमविक्रियमङ्कुरितमनोभवेनेव[1] ॥११॥

उर्व० । (सव्रीडम्) हला किंवि परदोओसर ।
सखि किमपि परतोऽपसर ।

चित्र० । (सस्मितम्) णाहं सक्का ।
नाहं शक्ता ।

रम्भा । एध सहाजेमो राएसिं । (सर्वा उपसर्पन्ति)
एत संभाजयामो[2] राजर्षिम् ।

राजा । सूत स्थापय तावद् रथम् ।

---

चक्रोद्घातं चक्रस्य रथाङ्गस्य उद्घातम् शिखरे प्रतिहतिं रूपयित्वा अभिनीय । हन्त हर्षे । स्वविषया[3]वतारः स्वदेशावतरणम् ।

यदयमित्यादि । यत् यस्मात्कारणात् ममांसः रथसंक्षोभात्[4] रथस्य पर्वतशिलाप्रतिघातकम्पात् । अञ्चितश्रोण्याः[5] अञ्चिता रम्या श्रोणिर्यस्याः सा तथोक्ता । तस्या अंसेन सरोमविक्रियं सरोमाञ्चं यथा भवति तथा स्पृष्टः, तस्माद्दत्तफल इति संबन्धः । कीदृशेनांसेन । अङ्कुरितमनोभवेनेव उदितमन्मथेनेव । अत्र सरोमविक्रियं स्पृष्ट इत्यनेन बीजस्य बहुलीकरणात्परिकरो नाम सन्ध्यङ्गमुक्तं भवति ॥११॥

---

[1] अङ्कुरितं मनसिजेनेव इति पाण्डुरङ्गधृतः कोशगतः पाठः । स चोत्प्रेक्षायाः सौष्ठवे ऽपीष्टार्थं नार्पयतीति नाभ्युपेतः । मनसिजेनानुक्तेन कर्त्राऽङ्कुराः समुत्पादिता इत्यनिष्टार्थः प्रसज्येत न तु मनसिजेनाङ्कुरवता जातमितीष्टार्थो लभ्येत । टीकाकृत्तु अङ्कुरितमनोभवेनेव इत्येव पठति पाठान्तरं च न जानीते ।

[2] संभावयाम इति पाण्डुरङ्गधृतः पाठः स च निकृष्ट इति नोपात्तः । सत्कारविशेषस्य वर्धापनलक्षणस्य दिष्ट्या महाराज इत्याद्युक्तेः प्रतीतिरेवास्य निकृष्टत्वे मानम् ॥

[3] एवमेव तपस्वी रङ्गनाथः । विशेषज्ञः काटयवेमोपीत्थं पपाठ न चासौष्ठवं संदिदेहेति चित्रम् ।

[4] निम्नोन्नतेषु स्यन्दनोपघातात्—इति नाथः ।

[5] अञ्चितश्रोण्याः—टीकापाठः ।

यावत् पुनरियं सुभ्रूरुत्सुकाभिः समुत्सुका ।
सखीभिर्याति संपर्कं लताभिः श्रीरिवार्तवी ॥१२॥

(सूतस्तथा करोति)

सर्वाः । दिट्ठिआ महाराओ विअएण वड्ढदि ।
दिष्ट्या महाराजो विजयेन वर्धते ।

राजा । भवत्यश्च सखीसमागमेन ।

उर्व० । (चित्रलेखादत्तहस्ता रथाद् अवतीर्य) हला एध पीडिदं मं
सख्य एत पीडितं मां
परिस्सजध । ण खु मे आसा आसि भूओवि
परिष्वजध्वम् । न खलु मम आशासीद् भूयोपि
सही-अणं पेक्खिस्संति ।
सखीजनं द्रक्ष्यामीति ।

(सत्वरं परिष्वजन्ते)

रम्भा । सव्वहा महाराओ कप्प-सदाइं पुहविं पालअन्तो होदु ।
सर्वथा महाराजः कल्पशतानि पृथ्वीं पालयिता भवतु ।

सूतः । आयुष्मन् पूर्वस्यां दिशि महता रथवेगेनोपदर्शितः शब्दः ।
अयं च गगनात् कोपि तप्तचामीकराङ्गदः ।
अवरोहति शैलाग्रं तडित्वानिव तोयदः ॥१३॥

---

यावत्पुनरित्यादिः—स्पष्टार्थः ॥१२॥

सख्यः इत पीडितं गाढं मां परिष्वजध्वम्, न खलु मे आसीदाशंसा भूयोऽपि सखीजनं द्रक्ष्यामीति ।

अयं चेत्यादिः—स्पष्टार्थः । १३ । आयुष्मन् पूर्वस्यामित्यादिना अम्मो चित्तरहो इत्यन्तेन सूतस्यानवधारणानन्तरं अम्मो चित्तरह इति निर्णयस्य प्रतीतेरिदं विमर्शादनु निर्णयकृतं पताका[1]स्थानकमित्यनुसन्धेयम् ।

---

१ दशरूपके तल्लक्षणं यथा—

प्रस्तुतागन्तुभावस्य वस्तुतोऽन्योक्तिसूचकम् ।
पताकास्थानकं तुल्यसंविधानविशेषणम् ॥१ । १४॥

(पश्यन्त्यप्सरसः)

सर्वाः । अम्मो चित्तरहो ।
अहो चित्ररथः ।

(ततः प्रविशति चित्ररथः)

चित्र० । ( राजानं दृष्ट्वा सबहुमानम् ) दिष्ट्या महेन्द्रोपकार-पर्याप्तेन विक्रममहिम्ना वर्धते भवान् ।

राजा । अये गन्धर्वराजः । (रथादवतीर्य) स्वागतं प्रियसुहृदे । (परस्परं हस्तौ स्पृशतः)

चित्रर० । वयस्य केशिना हृतामुर्वशीं नारदादुपश्रुत्य प्रत्याहरणार्थमस्याः शतक्रतुना गन्धर्वसेना समादिष्टा । ततो वयमन्तरा चारणेभ्यस्त्वदीयं जयोदाहरणं श्रुत्वा त्वामिहस्थमु-पागताः । स भवानिमां पुरस्कृत्य सहास्माभिर्मघवन्तं द्रष्टु-मर्हति । महत् खलु तत्रभवतो मघोनः प्रियमनुष्ठितं भवता । पश्य—

पुरा नारायणेनेयमतिसृष्टा मरुत्वते ।
दैत्यहस्तादपाच्छिद्य सुहृदा संप्रति त्वया ॥१४॥

राजा । मा मैवम् ।

ननु वज्रिण एव वीर्यमेतद्
विजयन्ते द्विषतो यदस्य पक्ष्याः ।
वसुधाधरकन्दराभिसर्पी
प्रतिशब्दोपि हरेर्भिनत्ति नागान् ॥१५॥

चित्रर० । युक्तमेतत् । अनुत्सेकः खलु विक्रमालंकारः ।

---

पुरा नारायणेनेत्यादि । नारायणेन महर्षिणा मरुत्वते इन्द्राय अतिसृष्टा दत्ता [1]अवच्छिद्य आच्छिद्य ॥१४॥

ननु वज्रिण इत्यादिः– स्पष्टः ॥१५॥

---

१ मूले तु बहुकोषप्रामाण्याद् अपाच्छिद्य इत्येव धृतम् ।

राजा । सखे नायमवसरो मम शतक्रतुं द्रष्टुम्। त्वमेवात्र-भवतीं प्रभोरन्तिकं प्रापय ।

चित्ररथ० । यथा भवान् मन्यते । इत इतो भवत्यः ।

(अप्सरसः प्रस्थिताः)

उर्व० । (जनान्तिकम्) हला चित्तलेहे उवआरिणंपि राएसिं ण
हला चित्रलेखे उपकारिणमपि राजर्षिं न

सक्कुणोमि आमन्तेदुं । ता तुमं मे मुहं होहि ।
शक्नोमि आमन्त्रयितुम् । तत् त्वं मम मुखं भव ।

चित्र० । (राजानमुपेत्य) वअस्स उव्वसी विण्णवेदि महा-
वयस्य उर्वशी विज्ञापयति महा-

राएण अब्भणुण्णादा इच्छामि पिअ-सहिं विअ महाराअस्स
राजेन अभ्यनुज्ञाता इच्छामि प्रियसखीमिव महाराजस्य

कित्तिं महिन्दलोअं णेदुंति ।
कीर्त्तिं महेन्द्रलोकं नेतुमिति ।

राजा । गम्यतां पुनर्दर्शनाय ।

(सर्वाः सगन्धर्वा आकाशोत्पतनं रूपयन्ति)

उर्व० । (उत्पतनभङ्गं रूपयित्वा) अम्हहे लदाविडवे मे एआवली
अहो लताविटपे मम एकावली

लग्गा । (परिवृत्य) चित्तलेहे मोआवेहि दाव णं ।
लग्ना चित्रलेखे मोचय तावद् एनाम् ।

चित्र० । (सस्मितम्) दिढं खु लग्गा । दुम्मोआ विअ मे
दृढं खलु लग्ना । दुर्मोचेव मम

पडिहादि । होदु । जदिस्सं दाव ।
प्रतिभाति । भवतु । यतिष्ये तावत् ।

---

सखि न विस्मरात्मनो वचनम् । दृढं खलु लग्नेत्येनेन उर्वश्या मनस्सङ्गो नाम द्वितीयावस्था सूचिता ।

---

१ दुम्मोआ इत्यस्य दुर्मोचनीया इति च्छायामाश्रयन्पाण्डुरङ्गः कालप्रभृतयस्तदनुगाश्च बहुभ्रमिषुः ।

उर्व० । सुमरेहि दाव एदं अत्तणो वअणं ।

स्मर तावद् एतद् आत्मनो वचनम् ।

चित्र० । (मोचनं नाटयति)

राजा । (स्वगतम्)

प्रियमाचरितं लते त्वया मे
गमनेऽस्याः क्षणविघ्नमाचरन्त्या ।
यदियं पुनरप्यपाङ्गनेत्रा
परिवृत्तार्धमुखी मयाऽद्य दृष्टा ॥१६॥

सूतः । आयुष्मन् ।

अदः सुरेन्द्रस्य कृतापराधान्
प्रक्षिप्य दैत्यान् लवणाम्बुराशौ ।
वायव्यमस्त्रं शरधिं पुनस्ते
महोरगः श्वभ्रमिव प्रविष्टम् ॥१७॥

राजा । तेन ह्युपश्लेषय रथं यावदारोहामि ।

सूतः । (रथमुपश्लेषयति । राजा नाट्येन रथमारूढः । उर्वशी राजानं विलोक्य सनिःश्वासं सह चित्रलेखया निष्क्रान्ता चित्ररथश्च)

राजा । (उर्वशीमार्गोन्मुखः) अहो नु खलु दुर्लभाभिनिवेशी मदनः ।

---

प्रियमाचरितमित्यादिः—स्पष्टः । अत्र बीजस्य दृढीकरणात्परिन्यास इति सन्ध्यङ्गमुक्तं भवति । अत्रैव अर्थानुकूल्येन सुखाप्तेर्गम्यमानत्वात्प्राप्तिर्नाम सन्ध्यङ्गमुक्तं भवति ॥१६॥

अदः इत्यादिः—स्पष्टः ॥ १७ ॥

उर्वशीगमनोन्मुखः, अहो नु खलु दुर्लभाभिनिवेशी मदन इत्यत्र बीजस्यानुसन्धानात्समाधानं नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ परिवृत्तमर्धं मुखं यस्या अत एव अपाङ्गयुक्ते (नेत्रे) यस्या एतादृशी दृष्टा । यद्वा अपाङ्गो मदनस्तज्जनके नेत्रे यस्यास्तादृशी—इति नाथः ।

एषा मनो मे प्रसभं शरीरात्
पितुः पदं मध्यममुत्पतन्ती ।
सुराङ्गनाऽऽकर्षति खण्डिताग्रात्
सूत्रं मृणालादिव राजहंसी ॥१८॥

(इति निष्क्रान्ताः सर्वे)

( इति विक्रमोर्वशीये नाटके प्रथमोङ्कः समाप्तः )

---

एषा मन इत्यादि । एषा सुराङ्गना पितुर्नारायणस्य मध्यमं पदमाकाशमुत्पतन्ती उद्गच्छन्ती सती मे शरीरात् मनः चित्तम् आकर्षति । अत्रोपमामाह—राजहंसी खण्डिताग्रात् मृणालात् बिसात् सूत्रमिव तन्तुमिव । अत्र राज्ञो मनःसङ्गो नाम द्वितीयावस्थेत्यनुसन्धेयम् । अत्र उर्वश्यादिनिर्गमनेन वस्तुविच्छेदे सति राज्ञो मनस्सङ्ग[1] उत्तराङ्कवस्तूपयोगित्वाद्बिन्दुरित्यनुसन्धेयम् । अत्रोपक्षेपादिषु सन्ध्यङ्गेषु कतिचिदेव कविनोक्तानि नत्वितराणि, तथापि न दोषः ।

न्यूनमप्यत्र यैः कैश्चिदङ्गैर्नाट्यं न दुष्यति ।
यद्युपात्तेषु संपत्तिराराधयति तद्विदः ॥१॥ इति वचनात् ।

अत्र उदात्तनायकस्य राजर्षेः पुरूरवसः साधारणनायिकायामुर्वश्यामनुरागो वर्णयितुमनुचित इति नाशङ्कनीयम्, अस्या दिव्यत्वात् ।

यथोक्तं वसन्तराजीये—

वे[2]श्या चेन्नायिका राज्ञः सा दिव्या स्यान्न मानुषी ॥ इति ॥

तथा च भारतीये—

दिव्यवेश्याङ्गना[3]नां हि राज्ञां भवति सङ्गमः ।
दिव्या[4] च वेश्या साप्यत्र यथैव कुलजा तथा ॥१॥

---

१ मनःसङ्गस्य—क.

२ या काचिन्नायिका राज्ञः सा दिव्या स्यान्न भौमिका—ग. इदमसाधु ।

३ दिव्यवेश्याङ्गनायाश्च—इति पाण्डुरङ्गः. एवं हि स भवानशुद्धं कोशगतं पाठमशुशुधत् परं साधुत्वं नासदत् । अत्र ह्रस्वत्वं किंनिमित्तं चकारश्च किं समुच्चिनोतीति न ज्ञायते ।

४ वाच्यापि—ग । अयमपपाठः ।

यदा मानुषसंयोगो दिव्यानां योषितां भवेत् ।
तदा सर्वत्र[1] कर्तव्या[1] ये भावा मानुषाश्रयाः ॥२॥
शापभ्रंशात्तु दिव्यानामङ्गनानां यदा भवेत् ।
मानुषैः[2] सह संयोगः तदैवमुपसर्पणम् ॥३॥
पुष्पैर्भूषणजैः शब्दैरदृश्यात्र[3] विलोभयेत् ।
पुनः सन्दर्शनं दत्वा क्षणादन्तर्हिता भवेत् ॥४॥
दिव्याभरणमालाद्यैर्लेखसंप्रेषणैरपि[4] ।
ईदृशैरभ्युपगमैः समुन्माद्यस्तु नायकः ॥५॥
उन्मादनात्समुत्पन्नः कामो रतिकरो भवेत् ।
स्वभावोपगतो लोके नात्यर्थं भावितस्तथा ॥६॥
ये भावा मानुषाणां तु यद्वृत्तं यच्च चेष्टितम् ।
तत्सर्वं मानुषं प्राप्य कार्यं [5]दिव्यैरपि द्विजाः ॥७॥ इति ॥

( निष्क्रान्ताः सर्वे )

इति काटयवेमभूपविरचिते
वसन्त (कुमारगिरि) राजीयविक्रमोर्वशीयव्याख्याने प्रथमोऽङ्कः समाप्तः ।

---

[1] सर्वं प्रकर्तव्यं—क, ख, घ.

[2] कार्या मानुषसंयोगः तथा चैवोपसर्पणम्—क, ख, घ.

[3] °श्या सा—ग.

[4] °संप्रेरणैरपि—घ.

[5] अत्र 'दिव्यैरपि द्विजः' इति पाठं कोश उपलभमानः तं चासाधुरिति मन्यमानः श्रीपाण्डुरङ्गः तत्र साधुत्वापिपादयिषया 'कर्तव्यं दैवतैरपि' इतीत्थं पर्यवर्तयत् । कीदृशाश्चायमभ्यूहितः परिवर्त इत्यत्र सन्त प्रमाणम् । भरतीये नाट्यशास्त्रे बहुत्र द्विजसंबोधनपूर्वं विषयवर्णनास्तीत्यस्योपेक्षणमेवात्र बीजं स्यात् ।

# अथ द्वितीयोऽङ्कः ।

( ततः प्रविशति विदूषकः )

विदू० । ही ही भो णिमन्तणोवाअणेण बम्हणो विअ राअ-रहस्सेण[1]
ही ही भोः निमन्त्रणोपायनेन ब्राह्मण इव राजरहस्येन
फुट्टमाणो[2] ण सक्कुणोमि आइण्णे अत्तणो जीहं रक्खिदुं ।
स्फोटमानो न शक्नोमि आकीर्णे आत्मनो जिह्वां रक्षितुम् ।
ता जाव तत्तभवं वअस्सो कज्जासणादो उट्ठेदि दाव
तद् यावत् तत्रभवान् वयस्यः कार्यासनाद्[3] उत्तिष्ठति[3] तावद्
इमस्सिं विरल-जण-संवादे विमाण[4]-पडिछ्छन्द-परिसरे चिट्ठिस्सं ।
एतस्मिन् विरलजनसंपाते विमानप्रतिच्छन्दपरिसरे स्थास्यामि ।

( परिक्रम्य स्थितः )

चेटी । (प्रविश्य) आणत्तम्हि देवीए कासि-राअ-पुत्तीए
आज्ञप्तास्मि देव्या काशिराज-पुत्र्या[5]

---

कविरिदानीमङ्कान्तरमारभमाणः कथासंघटनार्थं प्रथमं प्रवेशकं नामार्थोपक्षेपकं प्रस्तौति—

ततः प्रविशतीत्यादि । ही ही इति विदूषकहर्षे निपातः । ही ही वैदूषक इत्युक्तत्वात् । राजरहस्येनोद्घाट्यमानो न शक्नोम्याकीर्णे जनसंमर्दे आत्मनो जिह्वां रक्षितुम् । तस्माद्यावदत्रभवान् कार्यासनगतस्तिष्ठति तावदस्मिन् विरलजनसंपाते विमानप्रतिच्छन्दपरिसरे स्थास्यामि । विमानप्रतिच्छन्द इति तस्य प्रासादस्य संज्ञा ।

---

१ णिमन्तणेक्कपरवसो—टीका.

२ उग्घाडिअमाणो—टीका.

३ ०सनगतस्तिष्ठति—टीका.

४ विमाणुछ्छन्दपरि°—इति पाण्डुरङ्गधृतः पाठः । टीकापाठ एव श्रेयान् कवेरभिप्रेतश्चेत्यत्र अभिज्ञानशाकुन्तले दुष्यन्तप्रासादस्य मेघप्रतिच्छन्द इति नामधेयं लिङ्गम् ।

५ काशिरिति इदन्तं जनपदनामधेयम् । अत एव काश्यादिभ्यष्ठञ्ञिठौ इत्यत्र गणे काशिरितीदन्तमेव पठितम् । नगरविशेषस्य नाम्नः काशीशब्दस्य प्राचीनानामविदितत्वाद्वाराणसीत्याख्ययैव तस्य प्रथितत्वात्काशीराज इति केषां चिद्विन्यासः प्रामादिक इति नः प्रति भाति ।

६ ०संपाते—ग.

हञ्जे निउणिए जदो पहुदि भअवदो अक्कस्स[1] उवत्थाणं करिअ
हञ्जे निपुणिके यतः प्रभृति भगवतः अर्कस्योपस्थानं कृत्वा
पडिणिबुत्तो अज्जउत्तो तदो आरहिअ सुण्ण-हिअओ विअ
प्रतिनिवृत्त आर्यपुत्रः तत आरभ्य शून्यहृदय इव
लक्खीअदि । तं[2] अस्स पिअ-वअस्सादो अज्ज-माणवआदो
लक्ष्यते । तत् तस्य प्रियवयस्याद् आर्यमाणवकात्
जाणाहि दाव[3] से उक्कण्ठा-कारणंति । कहं खु मए बम्ह-बन्धू
जानीहि तावद् अस्योत्कण्ठाकारणमिति । कथं खलु मया ब्रह्मबन्धु-
अदिसंधेअो[4] । अहवा विरल-तण-लग्गं विअ अवस्साअ-सलिलं
रतिसंधेयः । अथवा विरलतृणलग्नम् इव अवश्याय-सलिलं
चिरं तस्सिं रहस्सं ण चिट्ठदि । जाव णं अण्णेसामि । एषो
चिरं तस्मिन् रहस्यं न तिष्ठति । यावद् एनम् अन्विष्यामि । एष
(परिक्रम्य अवलोक्य च) आलिहिदो वाणरो विअ किंपि तुण्हिं-भूदो
आलिखितो वानर इव किमपि तूष्णीम्भूतः
अज्ज-माणवओ चिट्ठदि । जाव णं उपसप्पामि । (उपसृत्य) अज्ज
आर्यमाणवकः तिष्ठति । यावद् एनम् उपसर्पामि । आर्य
वन्दे ।
वन्दे ।

विदू०। सत्थि भोदीए । (आत्मगतम्) इमं दुट्ठचेडिअं पेक्खिअ
स्वस्ति भवत्यै । इमां दुष्टचेटिकां दृष्ट्वा
तं राअ-रहस्सं हिअअं भिन्दिअ णिक्कमदि । (प्रकाशम्) णिउणिए
तद् राजरहस्यं हृदयं भित्त्वा निष्क्रामति । निपुणिके
संगीद-वावारं उज्झिअ कहिं पत्थिदा सि ।
संगीतव्यापारम् उज्झित्वा क्व प्रस्थितासि ।

---

१ सुय्यस्स—टीका.

२ ता तुमं गदुअ—टीका.

३ जस्से—टीका.

४ अतः परं होइ इत्यधिकम्—टीका.

निपु० । देवीए वअणेण अज्जं एव्व पेक्खिदुं ।
देव्या वचनेन आर्यम् एव द्रष्टुम् ।

विदू० । किं तत्तहोदी आणवेदि ।
किं तत्रभवत्याज्ञापयति ।

निपु० । देवी भणादि सदावि अज्जो मई पक्ख-वादी ण
देवी भणति सदापि आर्यो मयि पक्षपाती न
मं अणुइद-वेअणा-दुक्खिदं उवेक्खदित्ति ।
माम् अनुचितवेदनादुःखिताम् उपेक्षत इति ।

विदू० । (सवितर्कम्) किं वा वअस्सेण तत्तभोदीए पडिऊलं
किं वा वयस्येन तत्रभवत्याः प्रतिकूलम्
आचरिदं ।
आचरितम् ।

निपु० । अज्ज जं[2]-णिमित्तं भट्टा उक्कण्ठिदो ताए इत्थिआए
आर्य यन्निमित्तं भर्ता उत्कण्ठितस्तस्याः स्त्रिया
णामधेएण[3] भट्टिणा देवी आलविदा ।
नामधेयेन भर्त्रा देवी आलपिता ।

विदू० । (स्वगतम्) कहं सअं एव्व तत्तभवदा रहस्स-भेदो
कथं स्वयम् एव तत्रभवता रहस्यभेदः
किदो । किं दाणिं अहं जीहा-जन्तणेण दुक्खम् अणुहवामि । (प्रकाशम्)
कृतः । किम् इदानीम् अहं जिह्वायन्त्रणेन दुःखम् अनुभवामि ।
किं आमन्तिदा तत्तहोदी उव्वसित्ति ताए दंसणेण उम्मादिदो
किम् आमन्त्रिता तत्रभवती उर्वशीति । तस्या दर्शनेन उन्मादितः
तत्तभवं ण केवलं तत्तभोदिं मंपि विनोद-विमुहो दढं पीडेदि ।
तत्रभवान् न केवलं तत्रभवतीं मामपि विनोद-विमुखो दृढं पीडयति ।

---

आमित्यभ्युपगमे । तत्रभवती उर्वशीति किमालपिता ।

---

१ अणुभूदवेअणं सुदुक्खिदं—टीका.

२ जाए किल णिमित्तेण—टीका.

३ णामगहणेण—टीका.

निपु० । (आत्मगतम्) किदं मए भेअणं भट्टिणो रहस्स-
कृतं मया भेदनं भर्तू रहस्य-
दुग्गस्स । (प्रकाशम्) अज्ज किं दाव देवीए णिवेदेमि ।
दुर्गस्य आर्य किं तावद् देव्यै निवेदयामि ।

विदू० । णिउणिए विण्णवेहि तत्तभोदिं । जदामि दाव
निपुणिके विज्ञापय तत्रभवतीम् । यते तावद्
मिअतिण्हिआदो णिवत्तेदुं वअस्सं । तदो देवीए मुहं[2]
मृगतृष्णिकाया निवर्तयितुं वयस्यं ततो देव्या मुखं
पेक्खिस्संति ।
द्रक्ष्यामीति ।

निपु० । जं अज्जो आणवेदि ।
यद् आर्य आज्ञापयति ।

[ इति निष्क्रान्ता ।

(नेपथ्ये वैतालिकः) जयतु देवः ।

**आ लोकान्तात् प्रतिहततमोवृत्तिरासां प्रजानां**
**तुल्योद्योगस्तव दिनकृतश्चाधिकारो मतो नः ।**

---

आ लोकान्तादित्यादि । आ लोकान्तात् लोकस्य अन्तस्तस्मात् । [3]लोकालोक-पर्वतपर्यन्तमित्यर्थः । आसां प्रजानां प्रतिहततमोवृत्तिः प्रतिहता निरस्ता तमसो ध्वान्तस्य तमोगुणस्य च वृत्तिः प्रसारः[4] येन स तथोक्तः[5] । तव भवतः दिनकृतः सूर्यस्य च अधिकारो नियोगः तुल्योद्योगः समानव्यापारः नोऽस्माकं मतः संमतः । किञ्च

---

१ अतः परं जोएण इत्यधिकम्—टीका.

२ देवीं—टीका.

३ आ लोकपर्यन्तमित्यर्थः—ग. अत्र कर्मप्रवचनीयेनाङा योगे द्वितीया दुर्लभेति नैच्चत परिष्कर्तृप्रवरः पाण्डुरङ्गः । व्यर्थश्चायं पाठो गतार्थत्वात् ।

४ व्यापारः—ग.

५ नाथस्तु—आ लोकान्तात् लोकान्तमभिव्याप्य आसां प्रजानां प्रतिहततमोवृत्तिः निरस्तपापाचरणः । यद्वा आलोकान्ताद् आलोकनमात्रादासां प्रजानां जनानां प्रतिहततमोवृत्तिः । राज्ञोऽतिधार्मिकत्वात् तेजोवत्त्वाच्च । यदालोकनमात्रेणैव दण्डादिभयेन प्रजाभिः पापाचरणं न क्रियत इति भावः । इति व्याचष्टे ।

**तिष्ठत्येष क्षणमधिपतिर्ज्योतिषां व्योममध्ये**
**षष्ठे भागे त्वमपि दिवसस्यात्मनश्छन्दवर्ती ॥१॥**

**विदू०।** (कर्णं दत्त्वा) **एसो कज्जासणादो उट्ठिदो इदो एव्व**
एष कार्यासनाद् उत्थित इत एव
**आअच्छदि वअस्सो । जाव से पासवत्ती होमि ।**
आगच्छति वयस्यः । यावद् अस्य पार्श्ववर्ती भवामि ।

(प्रवेशकः) [ इति निष्क्रान्तः ।

---

ज्योतिषां त्विषाम् अधिपतिः सूर्यः व्योममध्ये एकं क्षणं क्षणमात्रकालं तिष्ठति आस्ते । सूर्यो मध्याह्ने क्षणमात्रं विश्राम्यतीति पौराणिकी प्रसिद्धिः । तथा च स्मृतिकारैरप्युक्तम्—[1]मध्याह्ने सर्वथा यस्मान्मन्दीभवति भास्करः[1] । इति ।
त्वमपि दिवसस्य षष्ठे भागे अष्टधा विभक्तस्याह्नः षष्ठांशे आत्मनश्छन्दवर्ती स्वेच्छावर्ती स्वतन्त्रास्तिष्ठसि । तथा चोक्तं वरदराजीये राजधर्मेषु[2]

दिवसस्याष्टमं भागं मुक्त्वा भागत्रयं[3] च यत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः ॥

दिवसमष्टभागं कृत्वा प्रथमभागमग्निहोत्रार्थं ब्राह्मणतर्पणार्थं च मुक्त्वा अनन्तरं भागत्रयं व्यवहारकाल इति ।

तथा च मनुः—
हुताग्निर्ब्राह्मणानर्च्य प्रविशेत्सुशुभां सभाम्[4] । इति ।
अनन्तरकालकर्तव्यमाह याज्ञवल्क्यः—
व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुञ्जीत कामतः । इति ।
तदनन्तरकालकर्तव्यमाह मनुः—
भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह । इति ॥१॥

(इति प्रवेशकः)

---

१–१ इति नास्ति—ग, घ.

२ धर्मे—ग.

३ कालत्रयं—क, ख.

४ मनुसंहितायामेवं पठ्यते—
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां सभाम् ॥७ । १४५ ॥

(ततः प्रविशति उत्कण्ठितो राजा विदूषकश्च)

राजा ।

आ दर्शनात् प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम् ।
बाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन ॥ २ ॥

विदू० । (आत्मगतम्) संपीडिदा खु दाव तवस्सिणी
संपीडिता खलु तावत् तपस्विनी

काशि-राअ-उत्ती ।
काशिराजपुत्री ।

राजा । अपि रक्ष्यते रहस्यनिक्षेपः ।

विदू० । (सविषादम् आत्मगतम्) हद्धी हद्धी अहिसंधिदो म्हि
हा धिक् हा धिक् अभिसंहितोऽस्मि

दासीए[1] । अण्णधा ण वअस्सो एव्वं पुच्छदि ।
दास्या । अन्यथा न वयस्य एवं पृच्छेत् ।

राजा । (साशङ्कम्) किं भवांस्तूष्णीमास्ते ।

विदू० । एव्वं मए णिअन्तिदा जीहा जं भवदोवि सहसा
एवं मया नियन्त्रिता जिह्वा यद् भवतोपि सहसा

पडिवअणं ण देमि ।
प्रतिवचनं न ददामि ।

राजा । युक्तम् । अथ केदानीमात्मानं विनोदयेयम् ।

विदू० । महाणसं गच्छम्ह ।
महानसं गच्छावः ।

राजा । किं तत्र ।

---

ततः प्रविशतीत्यादि । उत्कण्ठित उत्सुकः ।

आ दर्शनादित्यादिः-स्पष्टार्थः । अतिसंहितो वञ्चितोऽस्मि दास्याः पुत्र्या अन्यथा वयस्यो न मामेवं मन्त्रयते ।

---

[1] दासीए उत्तिआए—टीका.

विदू० । तहिं पञ्च-विहस्स अब्भवहारस्स उवणद-संभारस्स
तत्र पञ्चविधस्य अभ्यवहारस्य उपनतसंभारस्य
जोअणं पेक्खमाणेहिं सक्का उक्कण्ठा विणोदेदुं ।
योजनां प्रेक्षमाणाभ्यां शक्या उत्कण्ठा विनोदयितुम् ।

राजा । (सस्मितम्) तत्रेप्सितसंनिधानाद् भवान् रंस्यते ।
मया खलु दुर्लभप्रार्थनः कथमात्मा विनोदयितव्यः ।

विदू० । णं भवं तत्तहोदीए उव्वसीए दंसण-पहं गदो ।
ननु भवांस्तत्रभवत्या उर्वश्या दर्शनपथं गतः ।

राजा । ततः किम् ।

विदू० । ण खु सा दुल्लहत्ति [2]समत्थेमि ।
न खलु सा दुर्लभेति समर्थये ।

राजा । पक्षपातोयमवधार्यताम् ।

विदूः—एत्तिअं मन्तअन्तेण भवदा वड्ढिदं मे कोदूहलं ।
एतावद् मन्त्रयमाणेन भवता वर्धितं मम कौतूहलम्
किं तत्तभोदी उव्वसी अदुदिआ रूवेण अहं विअ विरूवदाए ।
किं तत्रभवत्युर्वशी अद्वितीया रूपेण अहम् इव विरूपतया ।

राजा । माणवक प्रत्यवयवमशक्यवर्णनां तामवेहि ।
समासतः श्रूयताम् ।

विदू० । अवहिदो म्हि ।
अवहितोस्मि ।

---

अभ्यवहारस्य पञ्चविधत्वं भक्ष्यभोज्यचोष्यलेह्यपानीयभेदेन । नन्विति प्रश्ने ।

---

१ अत्र नाथः—तर्कयामि यतस्त्वमेतादृशोऽनिर्वचनीयसौन्दर्यस्तद्दृक्पथं गतश्चेद-वश्यं त्वयि बद्धभावा सा न ते दुर्लभेति भावः ।

२ तक्केमि—टीका.

राजा ।

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥३॥

विदू० । अदो खु भवदा दिव्व-रसाहिलासिणा चादअ-वदं
अतः खलु भवता दिव्यरसाभिलाषिणा चातकव्रतं

गेहिदं ।
गृहीतम् ।

राजा । विविक्तादृते नान्यदुत्सुकस्य शरणमस्ति । तद्
भवान् प्रमदवनमार्गमादेशयतु ।

विदू० । (आत्मगतम्) का गदी । (प्रकाशम्) इदो इदो भवं ।
का गतिः । इत इतो भवान्

(परिक्रम्य) एदेण पमद-वण-चोदिदेण विअ पच्चुग्गदो भवं
एतेन प्रमदवनचोदितेनेव प्रत्युद्गतो भवान्

आअन्तुओ दक्खिणमारुदेण ।
आगन्तुको दक्षिणमारुतेन ।

राजा । ( विलोक्य ) उपपन्नं विशेषणमस्य वायोः ।
अयं हि—

---

आभरणस्येत्यादि । तस्या उर्वश्याः वपुः आभरणस्य हारकेयूरादेः आभरणं मण्डनम् । एतत्सम्बन्धेनाभरणस्यापि शोभातिशयो भवतीत्यर्थः । प्रसाधनविधेः चन्दन-चर्चादेः प्रसाधनविशेषः प्रसाधनभेदः[1]। एतत्सम्बन्धेन प्रसाधनस्यापि शोभातिशयो भवतीत्यर्थः । उपमानस्यापि चन्द्रादेरपि प्रत्युपमानम् । चन्द्रादयः कीदृशा इत्यपेक्षायाम्[2] उर्वश्या मुखादयो[3]ऽवयवाः[4] उपमानानि भवन्तीत्यर्थः । वपुःशब्देनावयवा लक्ष्यन्ते ॥ ३ ॥

---

१ इति नास्ति—ग.

२ इति जिज्ञासायाम्—ग.

३ मुखाद्यवयवाः—ग.

४ इत्यतः परं 'तेषाम्' इत्यधिकम्—ग.

निषिञ्चन् माधवीमेतां लतां कौन्दीं च नर्तयन् ।
स्नेहदाक्षिण्ययोर्योगात् कामीव प्रतिभाति मे ॥४॥

विदू० । ईरिसो एव्व दे अहिणिवेसो होदु । (परिक्रामितकेन)
ईदृश एव तव अभिनिवेशो भवतु ।
एदं पमद-वण-दुवारं पविसदु भवं ।
एतत् प्रमदवनद्वारम् । प्रविशतु भवान् ।

राजा । प्रविशाग्रतः ।

(उभौ प्रविशतः)

राजा । (अग्रतो विलोक्य) वयस्य मया न साधु समर्थितम् आपत्प्रतीकारः किल प्रमदवनोद्यानप्रवेश इति ।

विविक्षुर्यदहं तूर्णमुद्यानं तापशान्तये ।
स्रोतोजवोह्यमानस्य प्रतीपतरणं हि तत् ॥५॥

विदू० । कहं विअ ।
कथमिव ।

राजा ।

---

निषिञ्चन्नित्यादि । माधवीं वासन्तीं निषिञ्चन् प्रसवाधानवतीं कुर्वन् । एतां कौन्दीं लतां च वर्तयन्[2] व्यापारयन्, स्नेहदाक्षिण्ययोर्योगात्, माधव्यां स्नेहः कौन्द्यां दाक्षिण्यं तयोर्योगात् सम्बन्धात्, अयं वायुः कामीव[3] कामुक इव प्रतिभाति अवभासते ॥४॥

विविक्षुरित्यादिः—स्पष्टार्थः ।

---

१ निषिञ्चन् अतिमधुसम्पन्नां कुर्वन् इति नाथः ।

२ इति टीकापाठः । नाथस्तु लासयन् इति पठति ।

३ माधव्या हि वासन्तिक्या नववयोविशेषशालिन्या भामिन्या इव निषेको माध्याश्च कौन्द्या भ्रमरविसरापीतायाः प्रगल्भाया इव नर्तनमात्रमिति अहो कामिन इवास्य युक्तकारितेति भावः । एवं च माधवीमाध्ययोः ज्येष्ठाकनिष्ठाख्यनायिकाविशेषत्वं प्राकाशि—इति नाथः ।

इदमसुलभवस्तुप्रार्थनादुर्निवारं
प्रथममपि मनो मे पञ्चबाणः क्षिणोति ।
किमुत मलयवातोन्मूलितापाण्डुपत्रै-
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु ॥६॥

विदू० । अलं परिदेविदेण । अइरेण दे इच्छिअ-संपादइत्तओ[1]
अलं परिदेवितेन । अचिरेण तव ईप्सितसंपादयिता
अणङ्गो एव्व सुहदो भविस्सदि ।
अनङ्ग एव सुखदो भविष्यति[2] ।

राजा । प्रतिगृहीतं ब्राह्मणवचनम् ।

(परिक्रामतः)

विदू० । पेक्खदु भवं वसन्तोदार-सूअअं अहिरामत्तणं
पश्यतु भवान् वसन्तावतारसूचकं अभिरामत्वं
पमद-वणस्स ।
प्रमदवनस्य ।

राजा । ननु प्रतिपादपमेवावलोकयामि । अत्र हि
अग्रे स्त्रीनखपाटलं कुरबकं श्यामं द्वयोर्भागयो-
र्बालाशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति ।

---

इदमसुलभेत्यादिः स्पष्टः । अत्रेष्टार्थविषयेहाकथनाद्विलासो नाम सन्ध्यङ्गमुक्तं भवति ।

अग्रे स्त्रीनखेत्यादि । कुरबकं कुरबककुसुमम् । अग्रे उपरिभागे स्त्रीनखपाटलं स्त्री-नखवत्पाटलम् ईषद्रक्तम् । द्वयोर्भागयोः प्रदेशयोः श्यामं नीलम् । [3]रक्ताशोकं रक्ताशोक-कुसुमम् , उपोढरागसुभगम्[4] उपोढरागं प्राप्तरागम् उपोढः प्राप्तः रागो रक्तिमा येन

---

१ इच्छासंपादयितृकः—इति टीकाकृतश्छाया.

२ एतदनुरूपो भावः शाकुन्तले यथा–
स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः ।

३ रक्ताशोकमिति टीकापाठः ।

४ उत्कृष्टारक्ततासुन्दरम्—इति नाथः । (उपोढरागसुभगं भेदोन्मुखं च) अनेन विशेषणद्वयेन मुग्धदशाप्रान्त उक्तः । ईषद्रक्तेत्यादिना यौवनादिरवर्णि । इति च सः ।

**ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी**
**मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्रीः स्थिता ॥७**

विदू०। एसो मणि-सिला-पट्टअ-सणाहो अदिमुत्त-लदा-मण्डवो
एष मणिशिलापट्टकसनाथः अतिमुक्तलतामण्डपो
भमर-संघट्ट-पडिदेहिं कुसुमेहिं[3] सअं विअ किदोवआरो भवन्तं
भ्रमरसंघट्टपतितैः कुसुमैः स्वयम् इव कृतोपचारो भवन्तं
पडिच्छदि। ता अणुगेण्हीअदु दाव एसो।
प्रतीच्छति। तद् अनुगृह्यतां तावद् एषः।

राजा। यथा भवते रोचते।

(परिक्रम्य उपविष्टौ)

विदू०। इह सुहासीणो भवं ललिद-लदा-विलोहीअमाण-
इह सुखासीनो भवान् ललितलताविलोभ्यमान-
णअणो उव्वसी-गदं उक्कण्ठं विणोदेदु।
नयनः उर्वशीगताम् उत्कण्ठां विनोदयतु।

राजा। (निःश्वस्य)

**मम कुसुमितास्वपि सखे नोपवनलतासु नम्रविटपासु।**
**चक्षुर्बध्नाति धृतिं तद्रूपालोकदुर्ललितम् ॥८॥**

---

तत्तथोक्तं तच्च तत् सुभगं रम्यं च। भेदोन्मुखं विकासोन्मुखं तिष्ठति। चूते नवा नूतना मञ्जरी वल्लरी ईषद्बद्धरजःकणाग्रकलिका ईषद्बद्धाः रजःकणाः परागाः यासां ताः, ता अग्रकलिकाः प्रथमकोरका यस्यास्सा तथोक्ता, मधुश्रीः वसन्तलक्ष्मीः मुग्धत्वस्य बाल्यस्य च यौवनस्य च तारुण्यस्य च मध्ये अन्तरे स्थिता ॥७॥

**मम कुसुमितास्वित्यादि।** सखे वयस्य तद्रूपालोकदुर्ललितमुर्वशीगतरूपावलोकनदृप्तं मम चक्षुः कुसुमितास्वपि संजातकुसुमास्वपि नम्रविटपासु नम्रा नताः विटपाः क्षुद्रशाखा यासां ताः तासु उपवनलतासु उद्यानवल्लीषु, धृतिं प्रीतिं न बध्नाति न संयच्छति। अत्र कुसुमान्याभरणस्थानीयानि। विटपा बाहुस्थानीयाः। लता अङ्गयष्टि-

---

[1] °ग्रालिका—टीका.

[2] माहवी—टीका.

[3] छादिओ—इत्यधिकम्—टीका.

तदुपायश्चिन्त्यतां यथा सफलप्रार्थनो भवेयम् ।

विदू० । (विहस्य) भो अहल्ला-कामुअस्स महिन्दस्स वेज्जो
भो अहल्याकामुकस्य महेन्द्रस्य वैद्यः
उव्वसीपज्जुछ्छुअस्स भवदो अहं वि दुवे एथ्थ उम्मत्तआ ।
उर्वशीपर्युत्सुकस्य भवतोऽहमपि द्वौ अत्र उन्मत्तौ ।

राजा । अतिस्नेहः खलु कार्यदर्शी ।

विदू० । एसो चिन्तेमि । मा उण परिदेविदेण मम
एष चिन्तयामि । मा पुनः परिदेवितेन मम
समाधिं भिन्दि ।
समाधिं भिन्द्धि । (चिन्ततां रूपयति)

राजा । (निमित्तं सूचयित्वा । आत्मगतम्)

न सुलभा सकलेन्दुमुखी च सा
किमपि चेदमनङ्गविचेष्टितम् ।
अभिमुखीष्विव काङ्क्षितसिद्धिषु
व्रजति निर्वृतिमेकपदे मनः ॥९॥

(जाताशस्तिष्ठति)

---

स्थानीयाः । तस्मादासां लतानामुर्वशीरूपसादृश्ये विद्यमानेऽपि तथाविधसौभाग्याभावात् प्रीत्यभाव इत्यभिप्रायः । अत्रारतेर्गम्यमानत्वाद्विधूतं नाम सन्ध्यङ्गमुक्तं भवति[3] ॥८॥

तदुपायश्चिन्त्यतां यथा सफलप्रार्थनो भवेयमित्यत्र प्रयत्नो नाम द्वितीयावस्था सूचिता । बिन्दुप्रयत्नयोः समन्वयात्प्रतिमुखसन्धिरित्यनुसन्धेयम् ।

निमित्तं दक्षिणाक्षिस्पन्दनम् ।

न सुलभेत्यादिः—स्पष्टार्थः । अत्रारतिशान्तेः शम इति सन्ध्यङ्गमुक्तं भवति ।

---

१ उमदपरि°—टीका.

२ °तेर्ग°—कोशः ।

३ मम कुसुमितास्वित्येतच्छ्लोकव्याख्याने विशेषमाह नाथः—बहु (ममेत्यस्य स्थाने) कुसुमितास्वित्यनेन अत्यन्तं सौगन्ध्यनिर्भरत्वं लोचनलोभनयीत्वं च व्यज्यते । उपवनेत्यनेन अदूरवर्तितया अनायासलभ्यत्वम् । नम्रविटपास्वित्यनेन अतिघनतया प्रच्छायशीतलत्वं च द्योत्यते ।

४ साम्यात्—ग. अयमपपाठः ।

५ अत्रार्ति°—कोशः ।

(ततः प्रविशत्याकाशयानेन उर्वशी चित्रलेखा च)

चित्र० । हला कहिं अणिद्दिट्ठकालणं गच्छीअदि ।

सखि क्व अनिर्दिष्टकारणं गम्यते ।

उर्व० । सहि तदा हेमऊड-सिहरे लदा-विडवेण खण-

सखि तदा हेमकूटशिखरे लताविटपेन क्षण-

विग्घिदाआस-गमणं मं ओहसिअ किं दाणि पुच्छसि ।

विघ्निताकाशगमनां माम् उपहस्य किम् इदानीं पृच्छसि ।

चित्र० । किं तस्स राएसिणो पुरूरवस्स सआसं पत्थिदा सि ।

किं तस्य राजर्षेः पुरूरवसः सकाशं प्रस्थितासि ।

उर्व० । अअं मे अवहत्थिद-लज्जो ववसाओ ।

अयं मम अपहस्तितलज्जो व्यवसायः ।

चित्र० । को उण सहीए पुढमं पेसिदो ।

कः पुनः सख्या [1]प्रथमं प्रेषितः ।

उर्व० । हिअअं ।

हृदयम् ।

चित्र० । सअं एव्व साहु संपधारीअदु दाव ।

स्वयमेव साधु संप्रधार्यतां तावत् ।

उर्व० । मअणो खु मं णिओएदि । किं एत्थ संपधारीअदि ।

मदनः खलु मां नियोजयति । किम् अत्र संप्रधार्यते ।

चित्र० । अदो वरं णत्थि मे उत्तरं ।

अतः परं नास्ति ममोत्तरम् ।

उर्व० । तेण हि आदिसीअदु मग्गो जहं[2] गच्छन्तीणं

तेन हि आदिश्यतां मार्गो यथा गच्छन्त्यो-

---

अपहस्तितलज्जो निरस्तत्रपः । हिअअं हृदयं प्रेषितमिति संबन्धः ।
संप्रधार्यतां समर्थ्यताम् । निवेद्य गमनं युज्यते वा नवेति निश्चीयतामित्यर्थः ।

---

१ 'पुरतः' इति च्छायामाश्रयते पाण्डुरङ्गः ।

२ जहिं ( यस्मिन् )—टीका.

अन्तराओ ण भवे ।
रन्तरायो न भवेत् ।

चित्र० । सहि विस्सध्धा होहि । णं भअवदा देव-गुरुणा
सखि विस्रब्धा भव । ननु भगवता देवगुरुणा
अवराइदं णाम सिहा-बन्धण-विज्जं उवदिसन्तेण तिदस-पडि-
अपराजितां नाम शिखाबन्धनविद्याम् उपदिशता त्रिदशप्रति-
वक्खस्स अलङ्घणिज्जा कदह्म ।
पक्षस्य अलङ्घनीये कृत स्वः ।

उर्व० । अहो विसुमरिदं मे हिअअं ।
अहो विस्मृतं मम हृदयम् ।
(सिद्धमार्गमासाद्य)

चित्र० । एदं भअवदीए भाईरहीए जउँणा-संगम-विसेस-
एतद् भगवत्या भागीरथ्या यमुनासंगमविशेष-
पावणेसु सलिलेसु ओलोअन्तस्स विअ अत्ताणअं पइट्ठाणस्स[2]
पावनेषु सलिलेषु अवलोकयत इव आत्मानम् प्रतिष्ठानस्य
सिहाभरण-भूदं[3] राएसिणो भवणं उवट्ठिदह्म ।
शिखाभरणभूतं राजर्षेर्भवनम् उपस्थिते स्वः ।

उर्व० । (विलोक्य) णं वत्तव्वं ठाणन्तर-गदो सग्गोत्ति । (विचार्य)
ननु वक्तव्यं स्थानान्तरगतः स्वर्ग इति ।
हला कहिं णु खु सो आवण्णाणुकम्पी भवे ।
सखि क नु खलु स आपन्नानुकम्पी भवेत् ।

चित्र० । एदस्सिं णन्दण वणेक्कदेसे विअ पमद-वणे ओदरिअ
एतस्मिन् नन्दनवनैकदेश इव प्रमदवने अवतीर्य

---

(सखि क नु खलु) अत्र दृष्टनष्टानुसर्पणात् परिसर्पो नाम सन्ध्यङ्गमुक्तं भवति।

---

१ सहि सव्वं सुमेरेमि—टीका.
२ पइट्ठाण—णअरस्स—टीका.
३ सिहामण्डणभूदं—टीका.

जाणिस्सामो ।
ज्ञास्यावः ।

(उभे अवतरतः)

चित्र० । (दृष्ट्वा सहर्षम्) हला एसो खु पुढमोदिदो विअ
सखि एष खलु प्रथमोदित इव
चन्दो[1] कोमुदिं विअ तुमं पडिच्छेदि[2] ।
चन्द्रः कौमुदीम् इव त्वां प्रतीच्छति ।

उर्व० । (विलोक्य) हला दाणिं पुढम-दंसणादो साविसेसं
हला इदानीं प्रथमदर्शनात् सविशेषं
पिअदंसणो महाराओ पडिहादि ।
प्रियदर्शनो महाराजः प्रतिभाति ।

चित्र० । जुज्जदि । ता एहि उवसप्पम्ह ।
युज्यते । तद् एहि उपसर्पावः ।

उर्व० । तिरक्खरिणी-पडिच्छण्णा पास-गदा से भविअ
तिरस्करिणी-प्रतिच्छन्ना पार्श्वगता अस्य भूत्वा
सुणिस्सं दाव । पास-पडिवत्तिणा वअस्सेण सह
श्रोष्यामि तावत् । पार्श्वपरिवर्तिना वयस्येन सह
विअणे किंपि मन्तअन्तो चिट्ठदि ।
विजने किमपि मन्त्रयमाणस्तिष्ठति ।

चित्र० । जह दे रोअदि । (यथोक्तमनुतिष्ठतः)
यथा ते रोचते ।

विदू० । भो[3] चिन्तिदो मए दुल्लह-प्पणइणी-समाअमोवाओ ।
भोः चिन्तितो मया दुर्लभप्रणयिनीसमागमोपायः ।

राजा । (तूष्णीमास्ते)

---

१ भअवं चन्दमा—टीका.

२ बढिक्खदि ( प्रतीचते )—टीका.

३ वअस्स इत्याधिकम्—टीका.

* सदा भवान् फाल्गुनस्य गुणैरस्मान् विकत्थते
(=अपवदति)
इति महाभारते.



उर्व० । का णु खु एसा इत्थिआ इमिणा पत्थीअमाणा
का नु खल्वेषा स्त्री अनेन प्रार्थ्यमाना

* अत्ताणअं विकत्थेदि ।
(आत्मानं) विकत्थते[1] । apte leaves आत्मानं

चित्र० । किं उण माणुस्सअं[2] विडम्बीअदि[3] ।
किं[4] पुनः मानुष्यं विडम्ब्यते ।

उर्व० । भयामि सहसा पभावादो विण्णादुं ।
बिभेमि सहसा प्रभावाद् विज्ञातुम् ।

विदू० । णं भणामि चिन्तिदो उवाओत्ति ।
ननु भणामि चिन्तित उपाय इति ।

राजा । तेन हि कथ्यताम् ।

विदू० । सिविणअ[5]-समाअम-आरिणिं णिद्दं सेवदु भवं ।
स्वप्नसमागमकारिणीं निद्रां सेवतां भवान् ।
अहवा तत्थभोदीए उव्वसीए पडिकिदिं आलिहिअ
अथवा तत्रभवत्या उर्वश्याः प्रतिकृतिमालिख्य
ओलोअन्तो चिट्ठ ।
अवलोकयंस्तिष्ठ ।

उर्व० । ( सहर्षम् ) हीणसत्त हिअअ समस्सस समस्सस ।
हीनसत्त्व हृदय समाश्वसिहि समाश्वसिहि ।

---

या अनेन प्रार्थ्यमाना आत्मानं विकत्थयति बहुमानपात्रं संभावयते । किं पुनर्मानुष्यकं मनुष्यभावः 'अवलम्ब्यते । योपधाद् गुरूपोत्तमाद् वुञ् इति वुञ्प्रत्ययः । दिव्या त्वं मानुषीव किं विचारयसि, राज्ञा प्रार्थ्यमानां तां प्रभावतो जानीहीत्यभिप्रायः । बिभेमि सहसा प्रभावतो ज्ञातुम् । अत्र भयकारणं राजप्रार्थिताऽन्या भवेदिति शङ्का ।

---

१ विकत्थयति—टीकाकृतश्छाया.

२ माणुस्सअं—टीका.

३ अवलंबीअदि—टीका.

४ रङ्गनाथस्तु—ध्यानाय किं विलम्ब्यते इति पठति ।

५ सिविणध—टीका.

राजा । उभयमपि अनुपपन्नम् ।

हृदयमिषुभिः कामस्यान्तः सशल्यमिदं सदा
कथमुपलभे निद्रां स्वप्ने समागमकारिणीम् ।
न च सुवदनामालेख्येपि प्रियामसमाप्य तां
मम नयनयोरुद्बाष्पत्वं सखे न भविष्यति ॥ १० ॥

हरिणी छन्दः ।

चित्र० । सुदं तुए ।
श्रुतं त्वया ।

उर्व० । सुदं । ण उण पज्जत्तं हिअअस्स ।
श्रुतम् । न पुनः पर्याप्तं हृदयस्य ।

विदू० । एत्तिओ मे मदि-विहवो ।
एतावान् मम मतिविभवः ।

राजा । ( सनिश्वासम् )

नितान्तकठिनां रुजं मम न वेद यो मानसीं
प्रभावविदितानुरागमवमन्यते वापि माम् ।

---

हृदयमित्यादि । यतः यस्मादिदं हृदयं मनः कामस्य इषुभिः बाणैः अन्तः अन्तरे सशल्यं शल्यसाहितम्, अतः स्वप्ने समागमकारिणीं संगमकारिणीं निद्रां कथमुपलभे प्राप्नोमि । कथमित्याक्षेपे । नोपलभ इत्यर्थः । किं च आलेख्येऽपि चित्रेऽपि सुवदनां तां प्रियामुर्वशीमसमाप्य स्थितवतो मम नयनयोरुद्बाष्पत्वमुदश्रुत्वं न भविष्यतीति न[2] । भविष्यत्येवेत्यर्थः । तस्मादुभयमप्यनुपपन्नमिति सम्बन्धः ॥१०॥

नितान्तकठिनामित्यादि । यो जनः नितान्तकठिनां मम मानसीं पीडां न वेद न जानाति । अथवा प्रभावविदितानुरागं प्रभावेण स्वकीयेन महिम्ना आत्मनो विदितो ज्ञातोऽनुरागो यस्य स तथोक्तः तं मामप्यवमन्यते अपि नाद्रियते[3] । अपिशब्दः

---

१ सा इति पाण्डुरङ्गधृतः पाठः । परमेष तस्मिञ्जने इति पुँल्लिङ्गेन सर्वनाम्ना तत्परामृष्टेन जनशब्देन चासम्भवत्सम्बन्धाद्धेयः । टीकाकृतापि य इत्येवा पाठि, यो जन इत्येवं तेनोपक्रान्तत्वात् ।

२ न हि सव्यथान्तःकरणस्य निद्रागमनमश्रुसमावृतनेत्रस्य लिखनं वा क्व चिद्धटत इति भाव इति नाथः ।

३ अत्र नाथः—कथं वा अमर्त्या मया मानुषे मनो निवेशनीयमित्याशयेनेति भावः ।

अलब्धफलनीरसान् मम विधाय तस्मिञ्जने
समागममनोरथान् भवतु पञ्चबाणः कृती ॥ ११ ॥

चित्र० । सुदं तुए ।
श्रुतं त्वया ।

उर्व० । हद्धी हद्धी । मं एव्वं अवगच्छदि । असमत्थम्हि
हा धिक् हा धिक् । माम् एवम् अवगच्छति । असमर्थास्मि
अग्गदो भविअ से पडिवअणस्स । पहावणिम्मिदेण
अग्रतो भूत्वा अस्य प्रतिवचनस्य । प्रभावनिर्मितेन
[1]भुज्जवत्तेण संपादिदुत्तरा होदुम् इच्छामि ।
भूर्जपत्रेण संपादितोत्तरा भवितुम् इच्छामि ।

चित्र० । अणुमदं मे ।
अनुमतं मम ।

उर्व० । ( ससंभ्रमं गृहीत्वा यथोक्तं करोति )

विदू० । ( दृष्ट्वा ) अविहा अविहा । भो किं णु खु एदं
अविधा अविधा । भोः किं नु खल्वेतद्
[2]भुअङ्ग-णिम्मोअं विअ संमुहे णो णिवडिदं ।
भुजङ्गनिर्मोक इव संमुखेऽस्माकं निपतितम् ।

---

शङ्कायाम् । तस्मिन् जने उर्वश्यां मम अलब्धफलनीरसान् अलब्धानि फलानि यैस्ते तथोक्ताः ते च ते नीरसाश्च तान् समागममनोरथान् विधाय पञ्चबाणः कृती कृतार्थो[3] भवतु । अत्र प्रथमार्धे [4]यथोत्तरवचनकरणात्प्रगमनं नाम सन्ध्यङ्गमुक्तं भवति । उत्तरार्धे मन्मथाधिक्षेपस्य गम्यमानत्वाद्वज्रमिति सन्ध्यङ्गमुक्तं भवति ॥११॥

एवमवगच्छतीत्यनेन प्रभावादनुरागं विदित्वापि मामवमन्यमानां जानातीत्ययमर्थः प्रतिपाद्यते । अविधेत्याक्रोशे ।

---

१ भुज्जवत्तलेहेन—टीका.

२ सप्प°—टीका.

३ अत्र नाथः—फलाभावे तु मरणमेव वैरस्ये निदानम् । तेन च तस्य बाणपञ्चकाङ्गीकारः सफलः स्यादिति फलव्यक्तिः ।

४ 'यथोक्तवचन'—ग. अयमपपाठः ।

राजा । ( विभाव्य ) भूर्जपत्रगतोयमक्षरविन्यासः ।

विदू० । ण खु अदिट्ठाए तत्तहोदीए उव्वसीए भवदो
न खलु अदृष्टया तत्रभवत्या उर्वश्या भवतः
परिदेविदं सुणिअ समाणाणुराअ-सूअआइं अक्खराइं
परिदेवितं श्रुत्वा समानानुरागसूचकान्यक्षराणि
विसज्जिआइं होन्ति ।
विसर्जितानि[1] स्युः ।

राजा । नास्त्यगतिर्मनोरथानाम् । ( गृहीत्वा अनुवाच्य । सहर्षम् ) सखे
प्रसन्नस्ते तर्कः ।

विदू० । भवं दाणिं पसीददु । एत्थ लिहिदं सुणिदुम्
भवान् इदानीं प्रसीदतु । अत्र लिखितं श्रोतुम्
इच्छामि ।
इच्छामि ।

उर्व० । साहु अज्ज णाअरिओसि ।
साधु आर्य नागरिकोऽसि ।

राजा । श्रूयताम् ( वाचयति )

सामिअ संभाविआ जह अहं तुए अमुणिआ ।
स्वामिन्[2] संभाविता यथाहं त्वया अज्ञाता ।
तह अणुरत्तस्स जइ णाम तुह उवरि ॥
तथानुरक्तस्य यदि नाम तवोपरि[3] ॥ १२ ॥

---

स्वामिन् नाथ यथाहं त्वया अज्ञाता इयं कीदृगवस्थेत्यपरामृष्टा, असंभाविता असंमानिता अहं च अनुरक्तस्य तवोपरि तथा तादृशी यदि नाम ज्ञात्री[4] असंभावयित्री

---

१ विसृष्टानि इति पाण्डुरङ्गाश्रिता छाया मूलेनाननुगता ।

२ स्वामिन्नसंभाविता—टीका.

३ °पर्यहं—टीका ।

४ अज्ञात्री—क, ख, घ.

णं[1] मे लुलिअ-पारिजाअ-सअणिज्जअम्मि होन्ति[2]।
ननु मम लुलितपारिजातशयनीये भवन्ति ।
णन्दण-वण-वादावि अच्चुण्हआ सरीरए ॥१३॥
नन्दनवनवाता अप्यत्युष्णकाः शरीरके ॥

उर्व० । किं णु खु संपदं भणिस्सदि ।
किं नु खलु सांप्रतं भणिष्यति ।

चित्र० । णं भणिदं एव्व कमल-णालाअमाणेहिं अङ्गेहि ।
ननु भणितमेव कमलनालायमानैरङ्गैः ।

विदू० । दिट्ठिआ मए विअ बुभुक्खिदेण सत्थिवाअणं
दिष्ट्या मया इव बुभुक्षितेन स्वस्तिवाचनम्
उपलद्धं भवदा समासासणं ।
उपलब्धं भवता समाश्वासनम् ।

राजा । समाश्वासनमिति किमुच्यते ।
तुल्यानुरागपिशुनं ललितार्थबन्धं
पत्रे निवेशितमुदाहरणं प्रियायाः ।

---

चेन्नामेत्यर्थः । लुलितपारिजातशयनीयके लुलितं तापलुठनाद्[3] व्याकीर्णं पारिजातानां पारिजातकुसुमानां शयनीयं यस्य तत्तथोक्तं तस्मिन् मम शरीरे नन्दनवनवाता अप्यत्युष्णा भवन्ति किं न। भवन्तीत्यर्थः । अतादृशत्वान्ममात्युष्णा भवन्तीत्यर्थः । अत्र स्वानुरागप्रकाशकस्य वाक्यस्योपपात्तिमत्वादुपन्यास इति सन्ध्यङ्गमुक्तं भवति ॥१२-१३॥

कमलनालायमानैः कमलनालवदाचरद्भिः । कण्टकितैरित्यर्थः । अनेन रोमाञ्चेन राज्ञो हृष्टत्वमुक्तं भवति । समाश्वासनं समाश्वासनकारणं पत्रमित्यर्थः ।

तुल्यानुरागेत्यादि । तुल्यानुरागपिशुनं समानप्रेमसूचकम् । ललितार्थबन्धं ललितो मधुरः अर्थस्य वस्तुनो बन्धः सँन्दर्भः यस्य तत्तथोक्तं[5] पत्रे निवेशितं

---

१ मह—टीका.

२ अतः परं 'किं' इति पठितम् ।

३ ०लुण्ठनाद्—ग, घ.

४ संसर्गः—ग. अपपाठः ।

५ ललितार्थबन्धौ अभिधेयरचनाविशेषौ यत्रेति वा—इति नाथः ।

उत्पद्मणो मम सखे मदिरेच्चणायाः
तस्याः समागतमिवाननमाननेन ॥१४॥

उर्व० । एत्थ णो सम-विभाआ पीदी ।
अत्र आवयोः समविभागा प्रीतिः ।

राजा । वयस्य अङ्गुलीस्वेदेन दूष्येरन्नक्षराणि । धार्यतामयं प्रियायाः स्वहस्तः ।

विदू० । (गृहीत्वा) किं दाणिं तत्तभोदी उव्वसी भवदो
किम् इदानीं तत्रभवत्युर्वशी भवतो
मणोरहाणं कुसुमं दंसिअ फले विसंवददि ।
मनोरथानां कुसुमं दर्शयित्वा फले विसंवदति ।

उर्व० । हला जाव उवगमण-कादरं हिअअं पज्जवत्थावेमि दाव
हला यावद् उपगमनकातरं हृदयं पर्यवस्थापयामि तावत्
तुमं से अत्ताणं दंसिअ जं मे खमं तं भणाहि ।
त्वमस्य आत्मानं दर्शयित्वा यन्मम क्षमं तद् भण ।

चित्र० । (तथेति तिरस्करिणीमपनीय राजानमुपेत्य) जेदु जेदु महाराओ ।
जयतु जयतु महाराजः ।

राजा । (सहर्षम्) स्वागतं भवत्यै । भद्रे

न तथा नन्दयसि मां सख्या विरहिता तया ।
संगमे पूर्वदृष्टेव यमुना गङ्गया विना ॥१५॥

चित्र० । णं पुढमं मेहराई दीसदि पच्छा विज्जुल्लदा ।
ननु प्रथमं मेघराजिर्दृश्यते पश्चाद् विद्युल्लता ।

विदू० । (अपवार्य) कहं ण एसा उव्वसी । ताए तत्तहोदीए
कथं नैषा उर्वशी । तस्यास्तत्रभवत्या

---

विन्यस्तं प्रियाया उदाहरणं वाचिकं, हे सखे उत्पद्मणो ममाननेन समागतं तस्या मदिरेक्षणाया आननमिव भवति । अत्र विशेषप्रतिपादनात् पुष्पं नाम सन्ध्यङ्गमुक्तं भवति ॥१४॥

न तथेत्यादिः—स्पष्टार्थः ।

अहिमदा सहअरी ।
अभिमता सहचरी ।

चित्र० । उव्वसी महाराअं सिरसा पणमिअ विण्णवेदि—
उर्वशी महाराजं शिरसा प्रणम्य विज्ञापयति ।

राजा । किमाज्ञापयति ।

चित्र० । मह सुरारिसंभवे दुज्जादे[1] महाराओ एव्व सरणं आसि ।
मम सुरारिसंभवे दुर्जाते महाराज एव शरणम् आसीत् ।
सा अहं तुह दंसण-समुत्थेण मअणेण बलिअं
सा अहं तव दर्शनसमुत्थेन मदनेन बलवद्
बाहीअमाणा भूओवि महाराएण अनुकम्पणीअत्ति ।
बाध्यमाना भूयोपि महाराजेन अनुकम्पनीयेति ।

राजा । भद्रमुखि—

पर्युत्सुकां कथयसि प्रियदर्शनां ताम्
आर्तं न पश्यसि पुरूरवसं तदर्थे ।
साधारणोयमुभयोः प्रणयः स्मरस्य
तप्तेन[2] तप्तमयसा घटनाय योग्यम् ॥१६॥

चित्र० । ( उर्वशीमुपेत्य ) हला एहि । तुवत्तोवि णिद्दअदरं मअणं
सखि एहि । त्वत्तोपि निर्दयतरं मदनं
देक्खिअ पिअअमस्स दे दूदिम्हि संवुत्ता ।
दृष्ट्वा प्रियतमस्य ते दूत्यस्मि संवृत्ता ।

---

पर्युत्सुकामित्यादि । प्रियदर्शनां तामुर्वशीं पर्युत्सुकामुत्कण्ठितां कथयसि, तदर्थे तत्कृते । अर्थे कृते च तादर्थ्ये इत्युक्तत्वात् । आर्तं संतप्तं पुरूरवसं न पश्यसि न जानासि । उभयोरावयोः साधारणः समानः अयं प्रणयः प्रेम स्मरस्य मन्मथस्य संघटनाय द्वयोः संयोजनाय भवति । अत्रोपमामाह—योक्तुः योजकस्य कारोः तप्तेन लोहेन तप्तं लोहमिव । अत्र तप्तशब्दावौचित्याल्लोहपरौ मन्तव्यौ ॥१६॥

---

१ दुर्नये—इति नाथः ।

२ तप्तेन तप्तमिव संघटनाय योक्तुः—इति टीकाकृत्पठति ।

उर्व० । (तिरस्करिणीमपनीय) अम्महे लहुअं तुए उज्झिदम्हि ।
अहो लघु त्वया उज्झितास्मि ।

चित्र० । इदो मुहुत्तादो जाणिस्सं का कं उज्झिस्सदित्ति ।
इतो मुहूर्त्तात् ज्ञास्यामि का कामुज्झिष्यतीति ।
आआरं दाव पडिवज्ज ।
आचारं तावत् प्रतिपद्यस्व ।

उर्व० । (सव्रीडम्) जेदु जेदु महाराओ ।
जयतु जयतु महाराजः ।

राजा । सुन्दरि

मया नाम जितं यस्य त्वयायं समुदीर्यते ।
जयशब्दः सहस्राक्षादगतः पुरुषान्तरम् ॥१७॥

(हस्ते गृहीत्वा एनामुपवेशयति)

विदू० । भोदि रण्णो पिअ-वअस्सो बम्हणो किं ण
भवति राज्ञः प्रियवयस्यो ब्राह्मणः किं न
वन्दीअदि ।
वन्द्यते ।

उर्व० । (सस्मितं प्रणमति)

विदू० । सत्थि भोदीए ।
स्वस्ति भवत्यै ।

(नेपथ्ये देवदूतः)

चित्रलेखे त्वरयोर्वशीम् ।

---

त्वया उज्झितास्मि । तदीयत्वादिति शेषः ।

मयेत्यादि । सहस्राक्षादिन्द्रात् पुरुषान्तरमन्यपुरुषम् अगतः अप्राप्तः । जयशब्दः जयेतिशब्दः यद्यस्मात्, यदि मम उदीर्यते उच्चार्यते तस्मात्तेन मया जितम् अजयि । सर्वोत्तरेणाभावीत्यर्थः ॥१७॥

किं न वन्द्यते । अत्र परिहासस्य गम्यमानत्वान्नर्मेति सन्ध्यङ्गमुक्तं भवति ॥

---

१—पडिच्छइस्सदित्ति—टीका.

मुनिना भरतेन यः प्रयोगो
भवतीष्वष्टरसाश्रयो नियुक्तः ।
ललिताभिनयं तमद्य भर्ता
मरुतां द्रष्टुमनाः सलोकपालः ॥१८॥

( सर्वे कर्णं ददति )

उर्व० । ( विषादं नाटयति )

चित्र० । सुदं पिअ-सहीए देव-दूदस्स वअणं । अणुमाणीअदु
श्रुतं प्रियसख्या देवदूतस्य वचनम् । अनुमान्यतां
महाराओ ।
महाराजः ।

उर्व० । णत्थि मे वाआ ।
नास्ति मे वाक् ।

चित्र० । महाराअ पर-वसो अअं जणो । ता महाराएण
महाराज परवशो ऽयं जनः । तद् महाराजेना-
अब्भणुण्णादा इच्छदि देवेसु अणवरद्धं अत्ताणअं कादुं ।
भ्यनुज्ञाता इच्छति देवेषु अनपराद्धमात्मानं कर्तुम् ।

---

मुनिना भरतेनेत्यादि । भरतेन भरताख्येन मुनिना अष्टरसाश्रयः अष्टानां रसानां शृङ्गारवीरबीभत्सरौद्रहास्याद्भुतभयानककरुणानामाश्रय आस्पदं यः प्रयोगो नाट्यप्रयोगः भवतीषु युष्मासु । अप्सरःस्त्रीष्वित्यर्थः । नियुक्तः निहितः । प्रतिष्ठापित इत्यर्थः । अद्य इदानीं सलोकपालः लोकपालसहितः मरुतां देवानां भर्ता स्वामी इन्द्रः ललिताभिनयं ललितः सुकुमारः अभिनयो यस्य स तथोक्तः । तं प्रयोगं द्रष्टुमनाः द्रष्टुं निरीक्षितुं मनो यस्य स तथोक्तः । अत्र तुं काममनसोरपीति तुमुनो मकारस्य लोपः । अत्र रसाश्रयो ललिताभिनय इत्यनेन शृङ्गाररसप्रधानमुपसृष्टान्यरसं किमपि नाटकं सूच्यते । तथा चोक्तं वसन्तराजीये—

एको रसो भवेदङ्गी वीरशृङ्गारयोर्द्वयोः ।
अङ्गान्यन्ये रसाः सर्वे भवेन्निर्वहणेऽद्भुतः ॥ इति ।

एतदेव नाटकं नामतो वक्ष्यति—सरस्सई—किअ—कव्वबन्धे लच्छी-सअंवरे इति ॥१८॥

अनुमान्यतां महाराजः । गमनायेति शेषः ।

राजा । ( कथंचिद् वाचं व्यवस्थाप्य ) नास्मि भवत्योरीश्वरनियोग-
प्रत्यर्थी । स्मर्तव्यस्त्वयं जनः ।

उर्व० । ( वियोगदुःखं रूपयन्ती सह सख्या निष्क्रान्ता )

राजा । ( सनिश्वासम् ) सखे वैयर्थ्यमिव चक्षुषः संप्रति ।

विदू० । ( पत्रं दर्शयितुकामः ) णं एदं—( इत्यर्धोक्ते आत्मगतम् )
ननु एतत्

हद्धी हद्धी उव्वसी-दंसण-विम्हिदेण मए तं
हा धिक् हा धिक् उर्वशीदर्शनविस्मितेन मया तद्
भुज्ज-वत्तअं परिभट्ठंपि हत्थादो पमादेण ण विण्णादं।
भूर्जपत्रं प्रभ्रष्टमपि हस्तात् प्रमादेन न विज्ञातम्।

राजा । भद्र किमसि वक्तुकाम इव ।

विदू० । मा भवं अङ्गाइं मुञ्चदु । दढं खु तुइ बद्ध-भावा
मा भवानङ्गानि मुञ्चतु । दृढं खलु त्वयि बद्धभावा

उव्वसी । ण सा इदो-गदं अणुराअं सिढिलेदि ।
उर्वशी । न सा इतोगतमनुरागं शिथिलयति ।

राजा । ममाप्येतदाशंसि मनः । तया खलु प्रस्थाने

अनीशया शरीरस्य हृदयं स्ववशं मयि ।
स्तनकम्पक्रियालक्ष्यैर्न्यस्तं निश्वसितैरिव ॥१९॥

विदू० । ( आत्मगतम् ) वेवदि मे हिअअं इमं वेलं तत्तभवदा
वेपते मे हृदयमिमां वेलां तत्रभवता
तस्स भुज्ज-वत्तस्स णाम गेण्हिदव्वं भविस्सादित्ति ।
तस्य भूर्जपत्रस्य नाम ग्रहीतव्यं भविष्यतीति ।

---

अनीशयेत्यादि । शरीरस्य अनीशया[1] अनीश्वरया तया उर्वश्या प्रस्थाने प्रयाणे विवशं परवशं हृदयं स्तनकम्पक्रियालक्ष्यैः निश्वसितैः मयि न्यस्तमिव निक्षिप्तमिव ॥१९॥

---

१ इन्द्राधीनत्वादित्यर्थः—इति नाथः ।

राजा । केनेदानीं दृष्टिं विलोभयामि । ( स्मृत्वा ) आ उपनयतु भवान् भूर्जपत्रम् ।

विदू० । (विषादं नाट्यति) हन्त ण दीसदि । गदं उव्वसीए
हन्त न दृश्यते । गतमुर्वश्या

मग्गेण ।
मार्गेण ।

राजा । सर्वत्र प्रमादी वैधेयः । ननु विचिनोतु भवान् ।

विदू० । (उत्थाय) णं इदो भवे इदो भवे ।
नन्वितो भवेदितो भवेत् (इति विचेतव्यं नाट्यति)

(ततः प्रविशति काशिराजपुत्री सपरिवारा देवी)

देवी । हञ्जे णिउणिए सच्चं तुए भणिदं इमं लदा-गेहं
हञ्जे निपुणिके सत्यं त्वया भणितमिदं लतागेहं
पविसन्तो अज्ज-माणवअ-सहाओ अज्जउत्तो दिट्ठोत्ति ।
प्रविशन् आर्यमाणवकसहाय आर्यपुत्रो दृष्ट इति ।

निपु० । किं अण्णहा भट्टिणी मए विण्णविद-पुव्वा ।
किमन्यथा भट्टिनी मया विज्ञापितपूर्वा ।

देवी । तेण हि लदन्तरिदा सुणिस्सं दाव से वीसद्धा-
तेन हि लतान्तरिता श्रोष्यामि तावद् अस्य विस्रब्धा-
मन्तिदाणि । जं तुए कहिदं तं सच्चं ण वत्ति ।
मन्त्रितानि । यत् त्वया कथितं तत् सत्यं नवेति ।

निपु० । जं भट्टिणी आणवेदि ।
यद् भट्टिनी आज्ञापयति ।

देवी । (परिक्रम्य) हञ्जे णिउणिए किं एदं जिण्ण-चीरं विअ
हञ्जे निपुणिके किमेतत् जीर्णचीरमिव
इदोमुहं दक्खिण-मारुदेण आणीअदि ।
इतोमुखं दक्षिणमारुतेन आनीयते ।

---

वैधेयो मूर्खः । मूर्खवैधेयबालिशा इत्यमरः ।

निपु० । (विभाव्य) भट्टिणि पडिवत्तण-विभाविदक्खरं भुज्जवत्तं
भट्टिनि परिवर्तनविभाविताक्षरं भूर्जपत्रं
खु एदं । हन्त भट्टिणीए एव्व णेउर-कोडीए लग्गं।
खल्वेतद् । हन्त भर्त्र्या एव नूपुरकोट्या लग्नम्।
(गृहीत्वा) कहं वाईअदु ।
कथं वाच्यताम् ।

देवी । अणुवाएहि दाव णं । जदि अविरुध्धं तदो सुणिस्सं ।
अनुवाचय तावदेतत् । यदि अविरुद्धं ततः श्रोष्यामि ।

निपु० । (तथा कृत्वा) भट्टिणि तं एव्व कोलीणं विअ पडिहादि ।
भट्टिनि तदेव कौलीनमिव प्रतिभाति ।
भट्टारअं उद्दिसिअ उव्वसीए कव्वबन्धोत्ति तक्केमि ।
भर्तारम् उद्दिश्य उर्वश्याः काव्यबन्ध इति तर्कयामि ।
अज्जमाणवअ-पमादेण अम्हाणं हत्थं गदोत्ति ।
आर्यमाणवकप्रमादेन आवयोर्हस्तं गत इति ।

देवी । तेण हि से गहिदत्था होमि ।
तेन हि अस्य गृहीतार्था भवामि ।

निपु० । (राज्ञा पूर्ववाचितं वाचयति)

देवी । एत्थइमिणा एव्व उवाअणेण अच्छरा-कामुअं
अत्र अनेनैव उपायनेन अप्सरःकामुकं
पेक्खामि ।
पश्यामि ।

(इति परिजनसहिता लतागृहं परिक्रामति)

विदू० । भो वअस्स किं एदं पमद वण समीव-गद-कीला-
भो वयस्य किमेतत् प्रमदवनसमीपगतक्रीडा-
पव्वदपज्जन्ते दीसदि ।
पर्वतपर्यन्ते दृश्यते ।

---

कथं वाच्यताम् । कथमिति प्रश्ने ।

राजा । (उत्थाय) भगवन् वसन्तप्रिय दक्षिणवायो ।

वासार्थं हर संभृतं सुरभिणा पौष्पं रजो वीरुधां
किं मिथ्या भवतो हृतेन दयितास्नेहस्वहस्तेन मे ।
जानीते हि मनोविनोदनफलैरेवंविधैर्धारितं
कामार्तं जनमञ्जनां प्रति भवानालक्षितप्रार्थनः ॥२०॥

निपु० । भट्टिणि एदस्स एव्व अण्णेसणा वट्टदि ।
भट्टिनि एतस्यैव अन्वेषणा वर्तते ।

देवी । पेक्खामि ।
पश्यामि ।

विदू० । भो मिलाअमाण-केसर-च्छविणा मोरपिच्छेण
भो म्लायमानकेसरच्छविना मयूरपिच्छेन

वासार्थमित्यादि । सुरभिणा वसन्तेन संभृतं संपादितं वीरुधां लतानां पौष्पं पुष्पसम्बन्धि रजः परागं वासार्थं वासनार्थं हर गृहाण । मिथ्या वृथा हृतेन अपहृतेन मे दयितास्नेहस्वहस्तेन दयितायाः प्रियायाः स्नेहेन कृतः स्वहस्तः । स्वहस्तशब्देन स्वहस्तलिखितं लक्ष्यते । तथा चोक्तं [१]स्मृतिकारेण—

राजस्वहस्तसंशुद्धं शुद्धिमायाति शासनम् । इति ।

तेन भवतस्तव किं किं प्रयोजनम् । किंचित्प्रयोजनमित्यर्थः । अञ्जनां अञ्जनादेवीं प्रति आलक्षितप्रार्थनः दृष्टाभिलाषः भवान् कामार्तं जनं [३]मनोविनोदनफलैः मनोविनोदनं चेतोविश्रान्तिः फलं प्रयोजनं येषां तानि तैः एवंविधैः ईदृशैः [४]लेखनादिभिः धारितमवलम्बितं धृतप्राणं जानीते हि अवगच्छति खलु [५]॥२०॥

अत्र केसरशब्दः केसरपुष्पवाची ।

१ इति न धृतम्—क, ख.

२ वृत्ति—क, ख.

३ इति न धृतम्—क, ख.

४ लिखितादिभिः—ग.

५ अत्र श्लोके रङ्गनाथः—

मिथ्या हृतेन निरर्थकं नीतेन मे मम दयितायाः प्रियायाः स्नेहस्वहस्तेन स्नेहसूचको यः स्वहस्तो लक्षणया स्वहस्तलेखस्तेन भवतस्तव किम् । किं प्रयोजनमित्यर्थः । वीरुत्पुष्परजोहरणे हि ते सौगन्ध्यलाभोऽपि भविष्यति । लेखहरणे तु ते न केवलं न लाभः प्रत्युत मादृग्विधवधाधर्मोऽपि प्रसज्येतेति त्वया तादृशं न विधेयमिति भावः ।

विप्पलद्धो म्हि ।
विप्रलब्धोस्मि ।

राजा । हतोस्मि ।

देवी । (उपेत्य) अज्ज-उत्त अलं आवेएण । एदं तं भुज्ज-वत्तं
आर्यपुत्र[1] अलमावेगेन । एतत्तद् भूर्जपत्रम् ।

राजा । (ससंभ्रमम्) अये देवी । स्वागतं देव्यै ।

विदू० । (अपवार्य) दुरागदं दाणिं संवुत्तं ।
दुरागतमिदानीं संवृत्तम् ।

राजा । (जनान्तिकम्) सखे किमत्र प्रतिविधेयम् ।

विदू० । लोत्तेण गहिदस्स कुम्भिलअस्स अत्थि वा
लोत्रेण गृहीतस्य कुम्भीरकस्य अस्ति वा
पडिवअणं ।
प्रतिवचनम् ।

राजा । देवि नेदं मया मृग्यते । स खलु परसमन्वेषणार्थ-
मारम्भोयम् ।

देवी । जुज्जदि अत्तणो सोहग्गं पच्छादेदुं ।
युज्यत आत्मनः सौभाग्यं प्रच्छादयितुम् ।

विदू० । भोदि तुवरेहि से भोअणं जं पित्तोवसमण-
भवति त्वरयास्य भोजनं यत् पित्तोपशमन-

---

नेदं मया मृग्यते । इदं भूर्जपत्रं मया न मृग्यते नान्विष्यते । सोऽयमारम्भः व्यापारः अपरस्य अन्यस्यान्वेषणार्थो गवेषणार्थः । अत्र राज्ञा दोषप्रच्छादनान्नर्मयुतिर्नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ आर्यपुत्र इति पतिं प्रति पत्न्याः संबुद्धिः ।

ऊढायां देवि दयिते पुमानाह प्रियां प्रति ।
आर्यपुत्र च जीवेश नाथ साप्याह वल्लभम् ॥

इति सागरोक्तेः । इति नाथः ।

समत्थं होदि ।
समर्थं भवति ।

देवी । णिउणिए सोहणं खु बम्हणेण आसासिदो वअस्सो
निपुणिके शोभनं खलु ब्राह्मणेन आश्वासितो वयस्यः ।

विदू० । भोदि णं पेक्ख आसासिदो पिसाचोवि भोअणेण
भवति ननु पश्य आश्वासितः पिशाचोपि भोजनेन ।

राजा । मूर्ख बलादपराधिनं मां प्रतिपादयसि ।

देवी । णत्थि भवदो अवराहो । अहं एव्व एत्थ अवरद्धा ।
नास्ति भवतोऽपराधः । अहमेव अत्र अपराद्धा ।
जा पडिऊलदंसणा भविअ अग्गदो दे चिट्ठामि ।
या प्रतिकूलदर्शना भूत्वा अग्रतः ते तिष्ठामि ।
इदो अहं गमिस्सं ।
इतोऽहं गमिष्यामि ।
( कोपं नाटयित्वा प्रस्थिता )

राजा ।

अपराधी नामाहं
प्रसीद रम्भोरु विरम संरम्भात् ।
सेव्यो जनश्च कुपितः
कथं नु दासो निरपराधः ॥ २१ ॥

---

भोजनेनाश्वासितः पिशाचोपि उज्झति किं पुनरेतत्पित्तमिति सम्बन्धः ।

अपराधीत्यादि । रम्भोरु ऊरूत्तरपदादौपम्ये इत्यूङ् । अहमपराधी नाम अहमपराध्येव । प्रसीद प्रसन्ना भव । संरम्भात् रोषात् विरम विरता भव । स्वस्यापराधित्वं प्रतिपादयति–सेव्यजनश्चेत्यादि । सेव्यजनः स्वामी कुपितश्चेत् रुष्टो यदि दासः सेवकजनः कथं नु निरपराधः[1] अपराधरहितः । कथं न्वित्याक्षेपे । अपराध्येव भवतीत्यर्थः । अत्र स्त्रीणां मानापनयनोपायेषु साम प्रयुक्तमित्यनुसन्धेयम् । यथोक्तं[2] वसन्तराजीये–

साम्ना दानेन भेदेन नत्युपेक्षारसान्तरैः ।
मानापनयनं तासामुपायैः षड्भिराचरेत्[3] ॥

---

१ अनपराधः—क, ख. २ इति न धृतम्—क, ख. ३ °राभवेत्—क, ख.

(इति पादयोः पतति)

देवी । (आत्मगतम्) मा खु लहुहिअआ अहं अणुणअं बहुमण्णे ।
मा खलु लघुहृदयाहमनुनयं बहु मन्ये ।
किं दु अदक्खिणकिदस्स पच्छादावस्स भाएमि ।
किं तु अदाक्षिण्यकृतात् पश्चात्तापाद् बिभेमि ।
(राजानमपहाय सपरिवारा निष्क्रान्ता)

विदू० । पाउस-णदी विअ अप्पसण्णा गदा देवी । उट्ठेहि ।
प्रावृण्नदी इव अप्रसन्ना गता देवी । उत्तिष्ठ ।

राजा । (उत्थाय) वयस्य नेदमनुपपन्नम् । पश्य

प्रियवचनशतोपि योषितां दयितजनानुनयो रसादृते ।
प्रविशति हृदयं न तद्विदां मणिरिव कृत्रिमरागयोजितः[1] ॥

---

तत्र[2] चाटुवचः सामेति । अत्रैव सान्त्वनात्पर्युपासनमिति सन्ध्यङ्गमुक्तं भवति ॥

पादयोः पततीत्यत्र पूर्वप्रयुक्ते सामनि[3] व्यर्थे सति नतिर्नामोपायः प्रयुक्त इत्यनुसन्धेयम् । यथोक्तम्[4]—नतिः पादप्रणामः स्यात्[5] इति[6] ।

पश्चात्तापाद् बिभेमि । अत्र प्राकृते पञ्चम्यर्थे षष्ठी क्वचिदंसादेरित्युक्तत्वात् । अत्र देव्याः पश्चात्तापभीतिरुत्तराङ्कोपयोगित्वाद् बिन्दुरित्यनुसन्धेयम्[7] ।

वयस्य नेदमनुपपन्नम् । इदमुपपन्नमेवेत्यर्थः । इदंशब्देनाप्रसादगमनं परामृश्यते । प्रियवचनेत्यादि । दयितजनानुनयः दयितजनस्य प्रियजनस्य अनुनयः प्रार्थना प्रियवचनशतोऽपि प्रियाणि वचनशतानि यत्र स तथोक्तः । तादृशोऽपि रसादृते प्रेम्णा विना । प्रेमरहित इत्यर्थः । तद्विदां रसविदां योषितां हृदयं मनः न प्रविशति न संक्रामति । अत्रोपमामाह—तद्विदां मणिपरीक्षकाणां हृदयं कृत्रिमरागरूषितः कृत्रिमेण कृतकेन रागेण वर्णोत्कर्षेण रूषितः रञ्जितः मणिरिव रत्नमिव ॥२२॥

---

१ रूषितः—टीकापाठः ।
२ इति न धृतम्—क. ख.
३ सामनीत्यर्थे—ग, घ. अपपाठः ।
४ इति न धृतम्—क, ख.
५ पादयोः पतनं नतिः—इति दशरूपके (४ । ६२) ।
६ इत्यमरः—क, ख. अपपाठः ।
७ ०भीत्योरु०—क, ख । भीतिरु०—ग.

विदू० । अणुऊलं एत्थभवदो एदं । ण हु अक्खि-दुक्खिदो
अनुकूलमत्रभवत एतत् । न खलु अक्षिदुःखितः[1]
अभिमुहे दीवसिहं सहेदि ।
अभिमुखे दीपशिखां सहते ।

राजा । मा मैवम् । उर्वशीगतमनसोऽपि मे स एव देव्यां बहुमानः । किं तु प्रणिपातलङ्घनादहमस्यां धैर्यमवलम्बिष्ये ।

विदू० । चिट्ठदु दाव भवदो धीरदा । बुभुक्खिदस्स बम्हणस्स
तिष्ठतु तावत् भवतो धीरता । बुभुक्षितस्य ब्राह्मणस्य
जीविदं अवलम्बदु भवं । समओ खु ण्हाणभोअणं
जीवितमवलम्बतां भवान् । समयः खलु स्नानभोजनं
सेविदुं ।
सेवितुम् ।

राजा । (ऊर्ध्वमवलोक्य) गतमर्धं दिवसस्य ।

उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी
निर्भिद्योपरि कर्णिकारमुकुलान्यालीयते[3] षट्पदः ।

---

प्रणिपातलङ्घनात् प्रणामानङ्गीकारात्, अहमप्यस्यां देव्यां धैर्यं धृतिम् अवलम्बिष्ये। अत्र प्रणामोपायेऽपि व्यर्थे उपेक्षा नामोपायः प्रयुक्त इत्यनुसन्धेयम् । यथोक्तम्–उपेक्षा[2] धैर्यधारणमिति ।

उष्णालुरित्यादि। शिखी मयूरः। व्रीह्यादिपाठादिनिः । उष्णालुः उष्णासहः सन्। शीतोष्णतृप्रेभ्यस्तदसहने इत्यालुच् । तरोः शिशिरे शीतले मूलालवाले[4] निषीदति । षट्पदो भ्रमरः कर्णिकारमुकुलानि उपरि अग्रभागे निर्भिद्य विदलय्य आलीयते निलीनो

---

१ अक्षिदुःखितस्येत्यत्र प्राकृते पूर्वनिपातानियमाद् दुःखिताक्षस्येति विधेयम् इति नाथोक्तिश्चिन्त्या ।

२ स्यादुपेक्षावधीरणम् इति दशरूपके (४।६३) ।

३ ०शेरते षट्पदाः—इति नाथः ।

४ मूलकृतजलाधारे ।

स्यादालवालमावालमावाप इत्यमरः । इति नाथः ।

तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते
क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते ॥२३॥

[ इति निष्क्रान्ताः सर्वे ।

इति द्वितीयोऽङ्कः ।

---

भवति । कारण्डवः जलकुक्कुटः तप्तं वारि विहाय त्यक्त्वा तीरनलिनीं तटस्थां कमलिनीं सेवते भजते । क्रीडावेश्मनि लीलागृहे एष पुरोवर्ती पञ्जरशुकः क्लान्तः तान्तः । पिपासया ग्लान इत्यर्थः । जलं याचते प्रार्थयते ॥२३॥

इति श्रीकाटयवेमभूपविरचिते
विक्रमोर्वशीयव्याख्याने
द्वितीयोऽङ्कः ॥

—:*:—

# अथ तृतीयोऽङ्कः ।

(ततः प्रविशतो भरतशिष्यौ)

प्रथमः । सखे पल्लव महेन्द्रसदनं गच्छतोपाध्यायेन त्वमासनं प्रतिग्राहितः । अग्निशरणसंरक्षणाय स्थापितोऽहम् । अतः खलु पृच्छामि । अपि गुरोः प्रयोगेण दिव्या परिषदाराधिता ।

द्वितीयः । गालव ण आणे आराहिदा ण वत्ति । तस्सिं उण
गालव न जाने आराधिता न वेति । तस्मिन् पुनः
सरस्सई-किद-कव्वबन्धे लच्छी-सअंवरे तेसु तेसु
सरस्वतीकृतकाव्यबन्धे लक्ष्मीस्वयंवरे तेषु तेषु
रसन्तरेसु तम्मआ आसि । किं तु
रसान्तरेषु तन्मयी आसीत् । किं तु-

प्रथमः । सदोषावकाश इव ते वाक्यशेषः ।

द्वितीयः । आम तहिं उव्वसीए वअणं पमाद-क्खलिदं आसि ।
आम तस्मिन्नुर्वश्या वचनं प्रमादस्खलितमासीत् ।

प्रथमः । कथमिव ।

द्वितीयः । लच्छीभूमिआए वट्टमाणा उव्वसी वारुणीभूमिआए
लक्ष्मीभूमिकायां वर्तमाना उर्वशी वारुणीभूमिकायां
वट्टमाणाए मेणआए पुच्छिदा । सहि समाअदा एदे
वर्तमानया मेनकया पृष्टा । सखि समागता एते
तेलोक्क-सुपुरिसा सकेसवा लोअवाला । कदमस्सिं दे
त्रैलोक्यसुपुरुषाः सकेशवा[1] लोकपालाः । कतमस्मिंस्ते
भावाहिणिवेसोत्ति ।
भावाभिनिवेश इति ।

---

कविरिदानीमङ्कान्तरमारभमाणः कथासंघटनार्थं प्रथमं मिश्रविष्कम्भं नामार्थोपक्षेपकं प्रस्तौति—ततः प्रविशतीत्यादि । किन्तु आम[2] इत्यङ्गीकारे ।

---

१ भूमिका वेषपरिग्रहः । भूमिका रचनायां स्यान्मूर्त्यन्तरपरिग्रह इति विश्वः । इति नाथः ।

२ आमेति स्मरणे । आमा नुगुण्ये सरणे इति त्रिकाण्डी इति नाथः ।

प्रथमः । ततस्ततः ।

द्वितीयः । तदो ताए पुरिसोत्तमेति भणिदव्वे पुरूरवेत्ति
ततस्तया पुरुषोत्तम इति भणितव्ये पुरूरवसीति
णिग्गदा वाणी ।
निर्गता वाणी ।

प्रथमः । भवितव्यानुविधायीनीन्द्रियाणि । न खलु तामभिक्रुद्धो गुरुः ।

द्वितीयः । सा खु सत्ता उवज्झाएण । महिन्देण उण
सा खलु शप्ता उपाध्यायेन । महेन्द्रेण पुन-
रणुगहिदा ।
रनुगृहीता ।

प्रथमः । कथमिव ।

द्वितीयः । जेण मम उवदेसो तुए लङ्घिदो तेण ण दे दिव्वं
येन ममोपदेशः त्वया लङ्घितः तेन न ते दिव्यं
ठाणं हविस्सदित्ति उवज्झाअस्स सावो । महिन्देण
स्थानं भविष्यतीति उपाध्यायस्य शापः । महेन्द्रेण
उण पेक्खणावसाणे लज्जावणद-मुही भणिदा जस्सिं
पुनः प्रेक्षणावसाने लज्जावनत-मुखी भणिता यस्मिन्
बध्धभावा सि तस्स मे रण-सहाअस्स राएसिणो
बद्धभावासि तस्य मे रणसहायस्य राजर्षेः
पिअं एथ्थ करणिज्जं । सा तुमं जहाकामं पुरूरवसं
प्रियमत्र करणीयम् । सा त्वं यथाकामं पुरूरवस-
उवचिठ्ठ जाव सो तुइ दिठ्ठसंताणो भोदित्ति ।
मुपतिष्ठस्व यावत् स त्वयि दृष्टसंतानो भवेदिति ।

प्रथमः । सदृशं पुरुषान्तरविदो महेन्द्रस्य ।

---

प्रेक्षणावसाने नाट्याभिनयान्ते ।

द्वितीयः । (सूर्यमवलोक्य) कधा-पसङ्गेण अम्हेहिं अवरध्धा
कथाप्रसङ्गेन अस्माभिरपराद्धा[1]
अहिसेअ-वेला खु उवभ्भाअस्स । ता एहि से पास-
अभिषेकवेला खलूपाध्यायस्य । तदेहि अस्य पार्श्व-
परिवत्तिणो होम ।
परिवर्तिनौ भवावः ।

[इति निष्क्रान्तौ ।

विश्रविष्कम्भकः[2] ।

(ततः प्रविशति कञ्चुकी)

कञ्चुकी ।
सर्वः कल्ये वयसि यतते लब्धुमर्थान् कुटुम्बी
पश्चात्पुत्रैरपहृतभरः कल्पते विश्रमाय ।
अस्माकं तु प्रतिदिनमियं सादयन्ती शरीरं
सेवा कारापरिणतिरहो स्त्रीषु कष्टोधिकारः ॥१॥

सर्वः कल्य इत्यादि । कल्ये निरामये वयसि । पूर्ववयसीत्यर्थः । सर्वः कुटुम्बी । कुटुम्बः पुत्रपत्न्यादिपोष्यवर्गः[3]। सोऽस्यास्तीति कुटुम्बी । अर्थान् धनानि लब्धुं प्राप्तुं यतते व्याप्रियते। पश्चादपरे वयसि पुत्रैरपहृतभरः अपहृतः निरस्तः भरः कुटुम्बभारो यस्य स तथोक्तः विश्रमाय विश्रान्तये कल्पते संपद्यते । क्लृपेः संपद्यमाने चतुर्थी वक्तव्येति चतुर्थी। अस्माकं तु नः कञ्चुकिनां पुनः प्रतिदिनं दिने दिने। सर्वस्मिन्काले इत्यर्थः । शरीरं सादयन्ती क्षपयन्ती इयं सेवा कारापरिणतिः[4] कारया बन्धनगृहस्य

१ ०रुपरुद्धा--टीका ।

२ साहित्यदर्पणे तल्लक्षणं यथा—

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य कीर्तितः ॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः ।
शुद्धः स्यात्स तु संकीर्णो नीचमध्यमकल्पितः ॥

३ पुत्रपत्न्यादि०—ग.

४ कारापरिणतिर्बन्धनालयरूपाऽभूत् । यतो वार्धकेऽपि मुक्तिः सुतरां नास्तीति भावः । इति नाथः ।

(परिक्रम्य) आदिष्टोऽस्मि सनियमया काशिराजपुत्र्या व्रतसम्पादनार्थं मया मानमुत्सृज्य निपुणिकामुखेन पूर्वं याचितो महाराजः। तदेव मद्वचनाद् विज्ञापयेति। यावदिदानीमवसितसन्ध्याजाप्यं महाराजं पश्यामि। (परिक्रम्य अवलोक्य च) रमणीयः खलु दिवसावसानवृत्तान्तो राजवेश्मनि। इह हि

उत्कीर्णा इव वासयष्टिषु निशानिद्रालसा बर्हिणो
धूपैर्जालविनिःसृतैर्वलभयः संदिग्धपारावताः।
आचारप्रयतः सपुष्पबलिषु स्थानेषु चार्चिष्मतीः
सन्ध्यामङ्गलदीपिका विभजते शुद्धान्तवृद्धाजनः ॥२॥

(नेपथ्याभिमुखं दृष्ट्वा) अये इत एव प्रस्थितो देवः।

परिजनवनिताकरार्पिताभिः
परिवृत एष विभाति दीपिकाभिः।
गिरिरिव गतिमानपक्षलोपाद्
अनुतटपुष्पितकर्णिकारयष्टिः ॥ ३ ॥

---

परिणतिः परिणामः। अहो इत्याश्चर्ये। किञ्च स्त्रीषु अधिकारः नियोगः कष्टः कृच्छ्रः। कष्टे तु कृच्छ्रगहने इत्यमरः ॥१॥

उत्कीर्णा इत्यादि। निशानिद्रालसा बर्हिणः मयूराः वासयष्टिषु[1] निवासस्तम्भेषु उत्कीर्णा[2] इव उल्लिखिता इव। रचिता[3] इवेत्यर्थः। वलभयः सौधप्रदेशभेदाः जालविनिर्गतैः गवाक्षनिःसृतैः धूपैः सुरभिधूपैः सन्दिग्धपारावताः। संदिग्धाः संशयिताः पारावता यासु तास्तथोक्ताः। आचारप्रयतः आचारेण[4] प्रयतः[4] शुद्धान्तवृद्धाजनः शुद्धान्ते अन्तःपुरे वृद्धाजनः वृद्धस्त्रीजनः सपुष्पबलिषु पुष्पोपहारसहितेषु स्थानेषु उचितप्रदेशेषु अर्चिष्मतीः प्रकाशातिशयवतीः सन्ध्यामङ्गलदीपिकाः सन्ध्यायां मङ्गलार्थदीपान् विभजते विभक्ताः[5] करोति। तत्र तत्र निवेशयतीत्यर्थः ॥ २ ॥

परिजनेत्यादि। स्पष्टोऽर्थः।

---

१ अतः परं निवासयष्टिषु इत्यधिकम्—ग.

२ उत्कीर्णाष्टङ्कव्यक्तीकृतस्वरूपाः इति नाथः।

३ इति न धृतम्—क, ख.

४ इति न धृतम्—क, ख.

५ विभक्तान्—ग. अपपाठः।

यावदेनमवलोकनमार्गे स्थितः प्रतिपालयामि ।

( ततः प्रविशति यथानिर्दिष्टो राजा विदूषकश्च )

राजा । ( आत्मगतम् )

कार्यान्तरितोत्कण्ठं[1] दिनं मया नीतमनतिकृच्छ्रेण ।
अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या ॥४॥

कञ्चु० । ( उपगम्य ) जयतु जयतु देवः । देवी विज्ञापयति-मणिहर्म्यपृष्ठे सुदर्शनश्चन्द्रः । तत्र संनिहितेन देवेन प्रतिपालयितुमिच्छामि यावद् रोहिणीसंयोग इति ।

राजा । आर्य लातव्य विज्ञाप्यतां देवी यस्ते छन्द इति ।

कञ्चु० । यदाज्ञापयति देवः । [इति निष्क्रान्तः ।

राजा । वयस्य किं परमार्थत एव देव्या व्रतनिमित्तोयमारम्भः स्यात् ।

विदू० । भो तक्केमि जाद-पच्छादावा तत्तभोदी वेदावदेसेण[2] भवदो पणिपाद-लङ्घणं पमुज्जिदु-कामत्ति[3] ।
भोः तर्कयामि जातपश्चात्तापा तत्रभवती व्रतापदेशेन भवतः प्रणिपातलङ्घनं प्रमार्जितुकामेति ।

राजा । उपपन्नं भवानाह । तथा हि

अवधूतप्रणिपाताः पश्चात्संतप्यमानमनसोपि ।
निभृतैर्व्यपत्रपन्ते दयितानुनयैर्मनस्विन्यः[4] ॥५॥

---

कार्यान्तरित इत्यादि । स्पष्टोर्थः ।

अवधूतेत्यादिः । स्पष्टार्थः ।

---

१ कार्यैं राजकृत्यैरन्तरिता स्थगिता उत्कण्ठा यस्मिन् इति नाथः ।

२ वदकम्मव्वदेसेण—टीका.

३ प्रमार्ष्टुकामेति इति पाण्डुरङ्गाश्रिता च्छाया चिन्त्या ।

४ दयितानुशयैः—इति नाथः । दयितविषयकैरनुशयैः पश्चात्तापैर्व्यपत्रपन्ते लज्जन्ते । विविधैरनुतप्यन्ते इति पाठे विविधैर्नानाप्रकारकैर्दयितानुशयैः प्रियानुबन्धैरनुतप्यन्ते पश्चात्तापवत्यो भवन्ति—इति च सः । परमुभयस्मिन् पाठेऽर्थपौनरुक्त्यं दुष्परिहरम् । पश्चात्तापस्य प्रथमार्धे उक्तत्वात् ।

तदादेशय मणिहर्म्यपृष्ठमार्गम् ।

विदू० । इदो इदो भवं । इमिणा गङ्गा-तरङ्ग-सस्सिरीएण
इत इतो भवान् । एतेन गङ्गा-तरङ्ग-सश्रीकेण
फलिह–मणि–सोवाणेण आरोहदु भवं पदोसावसर-
स्फटिक-मणि–सोपानेन आरोहतु भवान् प्रदोषावसर-
रमणिज्जं[1] मणि-हम्मिअं ।
रमणीयं मणिहर्म्यम् ।

राजा । आरोहाग्रतः ।

( सर्वे सोपानोपसर्पणं रूपयन्ति )

विदू० । ( विलोक्य ) भो पच्चासण्णेण चन्दोदएण होदव्वं । जह
भोः प्रत्यासन्नेन चन्द्रोदयेन भवितव्यम् । यथा
तिमिर-रेईअमाणं[2] पुव्व-दिसा-मुहं आलोअ-सुहअं दीसदि ।
तिमिररिच्यमानं पूर्वदिङ्मुखमालोकसुभगं दृश्यते ।

राजा । सम्यगाह भवान् ।

उदयगूढशशाङ्कमरीचिभि–
स्तमसि दूरमितः प्रतिसारिते ।
अलकसंयमनादिव लोचने
हरति मे हरिवाहनदिङ्मुखम् ॥६॥

विदू० । ही ही । भो एसो खण्ड-मोदअ-सस्सिरीओ उदिदो
ही ही । भो एष खण्डमोदकसश्रीक उदितो
राआ दुआदीणं ।
राजा द्विजातीनाम् ।

राजा । ( सस्मितम् ) सर्वत्रौदरिकस्याभ्यवहार्यमेव विषयः ।
( प्राञ्जलिः प्रणिपत्य ) भगवन् क्षपानाथ ।

---

उदयगूढेत्यादि । स्पष्टोर्थः । प्रणिपत्य प्रणामं कृत्वा ।

---

१ पदोसरमणिज्जं—टीका.

२ रीअमाणं—टीका.

रविमावसते सतां क्रियायै
सुधया तर्पयते सुरान् पितॄंश्च ।
तमसां निशि मूर्छतां निहन्त्रे
हरचूडानिहितात्मने नमस्ते ॥७॥

**विदू०** । भो बम्हण-संकामिदक्खरेण[1] दे पिदामहेण अब्भणुण्णादो
भो ब्राह्मणसंक्रमिताक्षरेण ते पितामहेन अभ्यनुज्ञात
आसण-ट्ठिदो होहि जाव अहंपि सुहासीणो होमि ।
आसनस्थितो भव यावद् अहमपि सुखासीनो भवामि ।

**राजा** । (तथा विदूषकं परिगृह्य उपविष्टः । परिजनं विलोक्य) अभिव्यक्तायां चन्द्रिकायां किं दीपिकापौनरुक्त्येन । विश्राम्यन्तु भवत्यः ।

**परि०** । जं देवो आणवेदि ।
यद् देव आज्ञापयति ।

[इति निष्क्रान्तः

**राजा** । (चन्द्रमसमवलोक्य) वयस्य परं मुहूर्त्तादागमनं देव्याः । तद् विविक्ते कथयिष्यामि स्वामवस्थाम् ।

**विदू०** । णं दीसदि एव्व सा । किं दु तारिसं अणुराअं पेक्खिअ
ननु दृश्यत एव सा । किं तु तादृशम् अनुरागं प्रेक्ष्य
सक्कं आसाबन्धेण अत्ताणं धारेदुं ।
शक्यम् आशाबन्धेन आत्मानं धारयितुम् ।

---

**रविमावसत** इत्यादि । सतां सज्जनानां [2]क्रियायै अनुष्ठानाय रविं सूर्यम् आवसते संक्रामते । 'उपान्वध्याङ्वसः' इत्यधिकरणस्य कर्मसंज्ञा । सुधया अमृतेन सुरान् देवान् पितॄन् पितृदेवताश्च तर्पयते प्रीणयते । निशि मूर्च्छतां प्रवर्धमानानां तमसां निहन्त्रे विनाशयित्रे हरचूडानिहितात्मने हरस्य चूडायां मौलौ निहितः विन्यस्तः आत्मा मूर्तिर्यस्य स तथोक्तः । तस्मै तुभ्यं नमः ॥७॥

---

१ बह्मणाणसंकामिदक्खरेण—टीका.

२ क्रियायै दार्शिकपिण्डपितृयज्ञादिक्रियाहेतवे इति नाथः ।

राजा । एवमेतत् । बलवान् पुनर्मम मनसोभितापः[1] ।

नद्या इव प्रवाहो
विषमशिलासंकटस्खलितवेगः[2] ।
विघ्नितसमागमसुखो
मनसिशयः शतगुणीभवति ॥८॥

विदू० । भो जहा परिहीअमाणेहिं अङ्गेहिं अहिअं सोहसि तहा
भो यथा परिहीयमानैरङ्गैरधिकं शोभसे तथा
अदूरे पियासमागमं ते पेक्खामि ।
अदूरे प्रियासमागमं ते प्रेक्षे ।

राजा । (निमित्तं सूचयित्वा) वयस्य
वचोभिराशाजननैर्भवानिव गुरुव्यथम् ।
अयं मां स्पन्दितैर्बाहुराश्वासयति दक्षिणः ॥६॥

विदू० । ण हु अण्णहा बम्हणस्स वअणं ।
न खलु अन्यथा ब्राह्मणस्य वचनम् ।

राजा । (सप्रत्याशस्तिष्ठति)
(प्रविश्य आकाशयानेन[3] अभिसारिकावेषा उर्वशी चित्रलेखा च)

---

एवमेतत् । अत्र उर्वशीप्राप्तिसंभावनाया गम्यमानत्वात् प्राप्त्याशा नाम तृतीयावस्था सूचिता ।

बलवान् खलु मे मनसोभिलाषः । अत्र प्रसञ्जितस्य बीजस्य प्राप्त्याशयान्वयाद्गर्भसन्धिरिति मन्तव्यमिति ।

नद्या इवेत्यादि । स्पष्टोऽर्थः ।

वचोभिरित्यादि । स्पष्टोऽर्थः । अत्र बाहुस्पन्दस्योर्वशीप्राप्तिहेतुत्वादनुमानं नाम सन्ध्यङ्गमुक्तं भवति ।

न खल्वन्यथा ब्राह्मणस्य दर्शनं ज्ञानम् ।

प्रविश्येत्यादि । किञ्चित् क्षीबा ईषन्मत्ता, अभिसारिकावेषा अभिसारिकाया

---

१ °भिलाषः—टीका.

२ विषमा निम्नोन्नताः शिलास्तद्रूपं संकटं तत्र स्खलितवेगः प्रतिबद्धरयः इति नाथः ।

३ अतः परं किंचित्क्षीबा इत्यधिकं टीकायाम् ।

उर्व० । (आत्मानं विलोक्य) हला चित्तलेहे अवि रोअदि दे अअं
हला चित्रलेखे अपि रोचते तेऽयं
मे अप्पाभरण-भूसिदो णीलंसुअपरिग्गहो अहिसारिआवेसो
मे अल्पाभरणभूषितो नीलांशुकपरिग्रहोऽभिसारिकावेषः।

चित्र० । णत्थि मे वाआ-विहवो पसंसिदुं । इदं तु चिन्तेमि ।
नास्ति मे वाग्विभवः प्रशंसितुम् । इदं तु चिन्तयामि ।
अवि णाम अहं पुरूरवा भवेअंति ।
अपि नाम अहं पुरूरवा भवेयमिति ।

उर्व० । सहि मदणो खु तुमं आणवेदि सिग्घं णेहि मं तस्स
सखि मदनः खलु त्वामाज्ञापयति शीघ्रं नय मां तस्य
सुहअस्स वसर्दिति ।
सुभगस्य वसतिम् इति ।

चित्र० । णं एदं परिवात्तिदं विअ केलास-सिहरं पिअदमस्स दे
नन्वेतत् परिवर्तितमिव कैलासशिखरं प्रियतमस्य ते
भवणं उवगदम्ह ।
भवनम् उपगते स्वः ।

उर्व० । तेण हि पहावदो जाणाहि दाव कहिं सो मम हिअअ-
तेन हि प्रभावात् जानीहि तावत् क्व स मम हृदय-
चोरो किं वा अणुचिठ्ठदित्ति ।
चोरः किं वा अनुतिष्ठतीति ।

चित्र० । (ध्यात्वा । आत्मगतम्) भोदु कीलिस्सं दाव एदाए । (प्रकाशम्)
भवतु क्रीडिष्यामि तावदेतया ।

---

वेष इव वेषो यस्यास्सा तथोक्ता । अभिसारिकालक्षणमुक्तं वसन्तराजीये-यथा-

मदेन मदनेनापि प्रेरिता शिथिलत्रपा
योत्सुकांभिसरेत्कान्तं सा भवेदभिसारिका ।
कुब्जां गणिकां प्रेष्यां यथार्हैर्वेषचेष्टितै
रागातिशयसम्पन्नां वर्णयेदभिसारिकाम् ॥ इति ॥

परिवर्तितमिव रूपान्तरेण परिणतमिव ।

हला एसो मणोरह-लध्ध-पिश्रा-समाश्रम-सुहं श्रणुहवन्तो
सखि एष मनोरथ-लब्ध-प्रिया-समागम-सुखमनुभवन्-
उवहोश्र-क्खमे श्रोश्रासे चिट्ठदि ।
उपभोगक्षमे अवकाशे तिष्ठति ।

उर्व० । (विषादं नाटयति)

चित्र० । मुध्धे[1] का उण श्रण्णा चिन्ता पिश्रा-समाश्रमस्स ।
मुग्धे का पुनरन्या चिन्ता प्रियासमागमस्य ।

उर्व० । (सोच्छ्वासम्) अदाक्खिणं संदेहदि मे हिश्रश्रं ।
अदाक्षिणं संदिग्धे मे हृदयम् ।

चित्र० । (विलोक्य) एसो मणि-हम्मिअ-गदो वअस्स-मेत्त-सहाश्रो
एष मणि-हर्म्य-गतो वयस्यमात्रसहायो

राएसी । ता एहि उवसप्पाम णं ।
राजर्षिः । तद् एहि उपसर्पाव एनम् ।

(उभे अवतरतः)

राजा । वयस्य रजन्या सह विजृम्भते मदनबाधा ।

उर्व० । अणिब्भिण्णत्थेण[2] इमिणा वअणेण आकम्पिदं मे
अनिर्भिन्नार्थेन अनेन वचनेन आकम्पितं मम
हिअअं । अन्तरिदा एव्व सुणाम से सेरालावं जाव णो
हृदयम् । अन्तरिते एव शृणुवोऽस्य स्वैरालापं यावन्नो
संसअ-च्छेदो होदि ।
संशयच्छेदो भवति ।

चित्र० । जं दे रोश्रदि ।
यत् ते रोचते ।

---

सखि एषः । अत्र कपटकल्पनाया गम्यमानत्वादभूताहरणं नाम सन्ध्यङ्गमुक्तं भवति ।

(चित्रलेखा)–हुमिति वितर्के । त्वां विनेतिशेषः । अत्र यथार्थकथनेन मार्गो नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ हुम् । मुध्धे का उण अण्णा से चिन्ता समाश्रमसुहस्स—टीका.

२ अणवथ्थिदेण (अनवस्थितेन)—टीका.

विदू० । णं इमे अमिअ-गब्भा सेवीअन्दु चन्द-वादा ।
नन्वेते अमृत-गर्भाः सेव्यन्तां चन्द्र-पादाः ।

राजा । वयस्य एवमादिभिरनुपक्रम्योयमातङ्कः । पश्य

कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो
न च मलयजं सर्वाङ्गीणं न वा मणियष्टयः[1] ।
मनसिजरुजं सा वा दिव्या ममालमपोहितुम्

उर्व० । का वा अवरा ।
का वा अपरा ।

राजा । रहसि लघयेदारब्धा वा तदाश्रयिणी कथा ॥१०॥

उर्व० । हिअअ दाणिं मं उज्झिअ इदो संकन्तेण तुए फलं
हृदय इदानीं मामुज्झित्वा इतः संक्रान्तेन त्वया फल-
उवलद्धं ।
मुपलब्धम् ।

विदू० । आम हंपि जदा सिहरिणीं[2] रसालं (अ) ण लहे तदा
आम अहमपि यदा शिखरिणीं रसालं (च) न लभे तदा
णं पत्थन्तो चिन्तयन्तो[3] आसासेमि ।
एतत् प्रार्थयमानः चिन्तयन्नाश्वसिमि ।

राजा । संपद्यत इदं भवतः ।

विदू० । भवंपि तं अचिरेण पाविस्सदि ।
भवानपि तामचिरेण प्राप्स्यति ।

राजा । सखे एवं मन्ये ।

---

कुसुमशयनमित्यादि । स्पष्टोर्थः । आमेत्यङ्गीकारे ।

---

१ 'यष्टिः शस्त्रान्तरे चैव हारे हारात्परेपि च' इति विश्वलोचन इति नाथः ।

२ मिठ्ठहरिणीमंसभोअणं—पाण्डुरङ्गधृतः कोशगतः पाठः । अस्माभिस्तु टीकाकृत्पाठ उपात्तः । अत्र नाथोप्यनुकूलः । एलालवङ्गकर्पूरादिसुरभिद्रव्यमिश्रितं दुग्धेन सह गालितं सितासंगतं दधि शिखरिणीत्युच्यते इति च सः ।

३ संकित्तअन्तो—पाण्डुरङ्गधृतः कोशगतः पाठः ।

चित्र० । सुणु असंतुट्ठे सुणु ।

श्रृणु असंतुष्टे श्रृणु ।

विदू० । कहं विअ ।

कथमिव ।

राजा ।

अयं तस्या रथक्षोभादंसेनांसो निपीडितः ।

एकः कृती शरीरेऽस्मिन् शेषमङ्गं भुवो भरः ॥११॥

चित्र० । किं दाणिं विलम्बीअदि[1] ।

किम् इदानीं विलम्ब्यते ।

उर्व० । (सहसोपसृत्य) हला अग्गदोवि मम गदाए उदासीणो

हला अग्रतोपि मम गताया उदासीन

विअ महाराओ ।

इव महाराजः ।

चित्र० । (सस्मितम्) अदितुवरिदे अणुंक्खित्त-तिरक्खरिणीआ सि[2] ।

अतित्वरिते अनुत्क्षिप्ततिरस्करिणीकाऽसि ।

(नेपथ्ये) इदो इदो भट्टिणी ।

इत इतो भर्त्री ।

सर्वे । ( कर्णं ददति ) ।

उर्व० । ( सह सख्या विषण्णा )

विदू० । अविहा[3] अविहा[3] उवट्ठिदा देवी । ता वाचं-जमो होदि ।

अविधा अविधा उपस्थिता देवी । तद् वाचंयमो भव ।

राजा । भवानपि संवृताकारमास्ताम् ।

---

अयं तस्या इत्यादि । स्पष्टोर्थः । अत्र वाक्यस्योत्कर्षवत्वादुदाहरणं नाम सन्ध्यङ्गमुक्तं भवति ।

गताया मम इत्यत्र 'षष्ठी चानादरे' इति षष्ठी ।

---

१ विलंबेसि—टीका.

२ अणखित्त०—टीका । असंखित्ततिरक्खरिणी असि—इति नाथः ।

३ भो वअस्स—टीका.

उर्व० । हला किं एत्थ करणिज्जं ।
सखि किमत्र करणीयम् ।

चित्र० । अलं आवेएण । अन्तरिदा वयं । उववास-
अलम् आवेगेन । अन्तर्हिते आवाम् । उपवास-
णिअम-वेसा राएसि-महिसी दीसदि । ता ण एसा
नियमवेषा राजर्षिमहिषी दृश्यते । तद् नैषा
इह चिरं चिट्ठिस्सदि ।
इह चिरं स्थास्यति ।

( ततः प्रविशति औपहारिकहस्तपरिजना देवी )

देवी । (परिक्रम्य अवलोक्य च) हञ्जे णिउणिए एसो रोहिणी
हञ्जे निपुणिके एष रोहिणी-
संयोएण अहिअं सोहदि भअवं मिअ-लञ्छणो ।
संयोगेन अधिकं शोभते भगवान् मृगलाञ्छनः ।

चेटी । णं देवीसहिदो भट्टा विसेसरमणिज्जो । ( परिक्रामति )
ननु देवीसहितो भर्ता विशेषरमणीयः ।

विदू० । (दृष्ट्वा) भो ण जाणामि सत्थि-वाअणं देइत्ति
भो न जानामि स्वस्तिवाचनं ददातीति
आदु वद-व्ववदेसेण मुक्क-रोसा भवदो पणिपाद-
अथवा व्रतव्यपदेशेन मुक्तरोषा भवतः प्रणिपात-
लङ्घणं पमज्जिदु-कामत्ति अज्ज मे अक्खीणं
लङ्घनं प्रमार्ष्टुकामेति अद्य मम अक्ष्णोः

---

अन्तर्हिते आवाम् । अत्र शङ्कायाः गम्यमानत्वात्संभ्रमो नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ °किसा ( कृशा )—टीका.

२ भज्ज—टीका.

३ उत—टीका.

४ वदकम्मव्ववदेसेण—टीका.

५ इत्येतद् आदु इत्यतोनन्तरं पठति पाण्डुरङ्गः ।

सुहदंसणा देवी ।
सुखदर्शना देवी ।

राजा । (सस्मितम्) उभयमपि घटते । तथापि भवता यत् पश्चादभिहितं तन्मां प्रति भाति । यदत्र भवती

सितांशुका मङ्गलमात्रभूषणा
पवित्रदूर्वाङ्कुरलाञ्छितालका ।
व्रतापदेशोज्झितगर्ववृत्तिना
मयि प्रसन्ना वपुषैव लक्ष्यते ॥१२॥

देवी । (उपगम्य) जेदु जेदु अज्जउत्तो ।
जयतु जयतु आर्यपुत्रः ।

परि० । जेदु जेदु भट्टा ।
जयतु जयतु भर्ता ।

विदू० । सत्थि भोदीए ।
स्वस्ति भवत्यै ।

राजा । स्वागतं देव्यै । (तां हस्तेन गृहीत्वा उपवेशयति)

उर्व० । हला इअं ठाणे देवीसद्देण उवअरीअदि । ण किंपि
हला इयं स्थाने देवीशब्देन उपचर्यते । न किमपि
परिहीअदि सचीए ओजस्सिदाए ।
परिहीयते शच्या ओजस्वितया ।

चित्र० । साहु असूआ-परम्मुहं मन्तिदं ।
साधु असूयापराङ्मुखं मन्त्रितम् ।

देवी । अज्जउत्तं पुरोकरिअ कोवि वद-विसेसो मए संपादणीओ ।
आर्यपुत्रं पुरस्कृत्य कोपि व्रतविशेषो मया संपादनीयः ।
ता मुहुत्तं उवरोधो सहीअदु ।
तद् मुहूर्त्तम् उपरोधः सह्यताम् ।

---

सितांशुकेत्यादि । स्पष्टोर्थः ।

---

१ शुभदर्शना इति पाण्डुरङ्गादिभिराश्रिता छाया ।

राजा । मा मैवम् । अनुग्रहः खलु नोपरोधः ।

विदू० । ईरिसो[1] सत्थि-वाअणवन्तो उवरोहो बहुसो होदु ।

ईदृशः स्वस्तिवाचनवान् उपरोधो बहुशो भवतु ।

राजा । किंनामधेयमेतद् देव्या व्रतम् ।

देवी । ( निपुणिकामवेक्षते )

निपुं० । भट्टा पिआणुप्पसादणं णाम ।

भर्तः प्रियानुप्रासदनं नाम ।

राजा । ( देवीं विलोक्य )

अनेन कल्याणि मृणालकोमलं
व्रतेन गात्रं ग्लपयस्यकारणम् ।
प्रसादमाकाङ्क्षति यस्तवोत्सुकः
स किं त्वया दासजनः प्रसाद्यते ॥१३॥

उर्व० । महन्तो खु से इमस्सि बहुमाणो[2] ।

महान् खल्वस्य एतस्यां बहुमानः ।

चित्र० । अइ मुग्धे अण्ण-संकन्त-प्पेम्माणो णाअरिआ[3] अहिअं

अयि मुग्धे अन्यसंक्रान्तप्रेमाणो नागरिका अधिकं

दक्खिणा होन्ति ।

दक्षिणा भवन्ति ।

देवी । (सस्मितम्) णं इमस्स वद-परिग्गहस्स अअं पहावो जं

नन्वेतस्य व्रतपरिग्रहस्य अयं प्रभावो यद्

एत्तिअं मन्तावदो अज्जउत्तो ।

एतावद् मन्त्रित आर्यपुत्रः ।

---

अनेनेत्यादि । स्पष्टोऽर्थः । अत्र सान्त्वनस्य कथनात्संग्रहो नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ जदि ण सत्थिवाअणवन्तो तदा एसो उवरोहो होदि—इति टीकापाठः ।

२ सरिसि एव्व एसा आकिदी बहुमाणस्स इत्यधिकम्—टीका.

३ अतः परम् वि (अपि) इत्यधिकम्—टीका.

विदू० । विरमदु भवं । ण जुत्तं सुहासिदं पच्चाचरिदुं ।
विरमतु भवान् । न युक्तं सुभाषितं प्रत्याचरितुम् ।

देवी । दारिआओ उवणेध ओवहारिअं जाव मणिहम्मिअ-गदे चन्दपादे अच्चेमि ।
दारिका उपनयत औपहारिकं यावद् मणिहर्म्यगतां-श्चन्द्रपादान् अर्चामि ।

परि० । एसो गन्धकुसुमादिउवहारो ।
एष गन्धकुसुमाद्युपहारः ।

देवी । (नाट्येन गन्धपुष्पादिभिश्चन्द्रपादानभ्यर्च्य) हञ्जे इमे[1] ओवहारिअ-मोदए अज्जमाणवअं लम्भावेहि ।
हञ्जे एतान् औपहारिक-मोदकान् आर्यमाणवकं[2] लम्भय ।

परि० । जं देवी आणवेदि । अज्ज-माणवअ एदं दाव दे ।
यद् देवी आज्ञापयति । आर्यमाणवक एतत् तावत् ते ।

---

दारिका उपनयतौपहारिकम् । उपहारः समर्पणं प्रयोजनमस्येति ठक् प्रत्ययः । एसाहं दे वन्दामि । एषाहं त्वां वन्दे । प्राकृते क्वचिदसादेरिति द्वितीयार्थे षष्ठी ।

---

३ पच्चाचक्खिदुं (प्रत्याख्यातुं)—टीका.

१–१ इमं ओवहारिअं मोअअसरावं—टीका.

२ अत्राणौ कर्तुर्णिचि कर्मत्वं न प्राप्नोति लभेरगत्यर्थत्वात् इति चेन्मन्यसे, शृणु वामनवचनैर्बोध्यसे—

**लभेर्गत्यर्थत्वाण्णिच्यणौ कर्तुः कर्मत्वाकर्मत्वे ॥ (५।२।८)**

अस्त्ययं लभिः, यः प्राप्त्युपसर्जनां गतिमाह । अस्ति च यो गत्युपसर्जनां प्राप्तिमाहेति । अत्र पूर्वस्मिन्पक्षे गत्यर्थत्वाल्लभेर्णिचि अणौ यः कर्ता तस्य गत्यादिसूत्रेण कर्मसंज्ञा । यथा—

**दीर्घिकासु कुमुदानि विकासं लम्भयन्ति शिशिराः शशिभासः ।**

द्वितीये तु पक्षे गत्यर्थत्वालाभाल्लभेर्णिच्यणौ कर्तुर्न कर्मसंज्ञा । यथा—

**सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लम्भयन् ।**
**द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः ॥**

(शिशुपालवधे)

विदू० । (मोदकशरावं गृहीत्वा) सत्थि भोदीए । बहुफलो दे
स्वस्ति भवत्यै । बहुफलस्त-

उववासो होदु ।
वोपवासो भवतु ।

देवी । अज्जउत्त इदो दाव ।
आर्यपुत्र इतस्तावत् ।

राजा । अयमस्मि ।

देवी । (राज्ञः पूजामभिनीय प्राञ्जलिः प्रणिपत्य) एसा अहं देवदा-मिहुणं
एषाहं देवता-मिथुनं

रोहिणी-मिअ-लञ्छणं सक्खीकरिअ अज्ज उत्तं
रोहिणी-मृगलाञ्छनं साक्षीकृत्य आर्यपुत्रम्

अणुप्पसादेमि । अज्ज-प्पहुदि जं इत्थिअं अज्जउत्तो
अनुप्रसादयामि । अद्य प्रभृति यां स्त्रियम् आर्यपुत्रः

पत्थेदि जा अज्जउत्तस्स समाअम-प्पणइणी ताए
प्रार्थयते या आर्यपुत्रस्य समागमप्रणयिनी तया

मए पीदिबन्धेण वत्तिदव्वंति ।
मया प्रीतिबन्धेन वर्तितव्यमिति ।

उर्व० । अम्हहे ण आणे किं-परं से वअणंति । मम
अहो न जाने किंपरम् अस्या वचनमिति । मम

उण विस्सासविसदं हिअअं संवुत्तं ।
पुनर्विश्वासविशदं हृदयं संवृत्तम् ।

चित्र० । सहि महाणुहावाए पदि-व्वदाए अब्भणुण्णादो
सखि महानुभावया पतिव्रतया अभ्यनुज्ञातः

---

किंपरं कस्मिन्नर्थे तात्पर्यवत् । अनुनयपरं वा आक्षेपपरं वेत्यर्थः अभ्यनुज्ञात एव । अनेनाक्षेपपरं न भवतीति गम्यते ।

---

१-१ एसा हं दे वन्दामि—टीका । इदं पुनरुक्तं प्राञ्जलिः प्रणिपत्य इत्यनेन गतार्थत्वात् ।

२ विसेसविसदं—टीका

अणन्तराओ दे पिअ-समाअमो हविस्सदि ।
अनन्तरायः ते प्रियसमागमो भविष्यति ।

विदू० । (अपवार्य) छिन्नहत्थो मच्छे पलाइदे णिव्विण्णो
छिन्नहस्तो मत्स्ये पलायिते निर्विण्णो
धीवरो भणादि धम्मो मे हविस्सदित्ति (प्रकाशम्)
धीवरो भणति धर्मो मे भविष्यतीति ।

देवी । मूढं[1] अहं खु अत्तणो सुहावसाणेण[1] अज्जउत्तं
मूढ अहं खलु आत्मनः सुखावसानेन आर्यपुत्रं
णिव्वुदसरीरं कादुं इच्छामि । एत्तिएण[2] चिन्तेहि
निर्वृतशरीरं कर्तुम् इच्छामि । एतावता चिन्तय
दाव पिओ[2] ण वत्ति ।
तावत् प्रियो न वेति ।

राजा । दातुं वा प्रभवसि माम्
अन्यस्मै हर्तुमेव[3] वा दासम् ।
नाहं पुनस्तथा त्वं
यथा हि मां शङ्कसे भीरु ॥१४॥

देवी । होहि वा मा वा । जधा-णिद्दिट्ठं संपादिदं पिआणु-
भव वा मा वा । यथानिर्दिष्टं संपादितं प्रियानु-
प्पसादणं वदं । दारिआओ एध गच्छम्ह । (प्रस्थिता देवी)
प्रसादनं व्रतम् । दारिका एत गच्छामः ।

---

दातुं वेत्यादि । त्वमन्यस्मै मां दातुं प्रभवसि त्वमेव हर्तुं वा प्रभवसि । वेति पक्षान्तरे । भीरु अधीरे मयि मद्विषये यथा विशङ्कसे अहं पुनर्न तथा तथा-विधो न ॥१४॥

---

१—१ मूढ अहं अत्तणो सुहाचरणेण—टीका.

२—२ एत्तिएण से ण आणामि पीडा वा—टीका.

३ कर्तुमेव—पाण्डुरङ्गधृतः पाठः । अत्रेदं विचार्यम् । अदासस्य सतो दासीकरणं युज्येत नाम । स किं त्वया दासजनः प्रसाद्यते (३ । १३) इत्यत्र दासत्वं प्रतिपन्नवतः पुरूरवसो नेदं घटते । अतो नायं समञ्जसः पाठः ।

राजा । प्रिये न खलु प्रसादितोऽस्मि यदि संप्रति विहाय गम्यते ।

देवी । अज्जउत्त अलङ्घिद-पुव्वो मए णिअमो ।

आर्यपुत्र अलङ्घितपूर्वो मया नियमः ।

[ निष्क्रान्ता सपरिवारा देवी ।

उर्व० । हला पिअ-कलत्तो राएसी । तह वि[1] हिअअं णिवत्तेदुं

सखि प्रियकलत्रो राजर्षिः । तथाऽपि हृदयं निवर्तयितुं

ण सक्कुणोमि ।

न शक्नोमि ।

चित्र० । किं[2] उण तुए णिरासाए णिवत्तीअदि[2] ।

किं पुनः त्वया निराशया निवर्त्यते ।

राजा । (आसनमुपेत्य) वयस्य न खलु दूरं गता देवी ।

विदू० । भण विस्सद्धं जं सि वत्तुकामो । असभ्भोत्ति वेज्जेण[3]

भण विस्रब्धं यदासि वक्तुकामः । असाध्य इति वैद्येन

आदुरो विअ[3] सेरं मुत्तो भवं तत्तहोदीए ।

आतुर इव स्वैरं मुक्तो भवांस्तत्रभवत्या ।

राजा । अपि नामोर्वशी-

उर्व० । अज्ज किदथ्था भवे ।

अद्य कृतार्था भवेत् ।

राजा ।

गूढा नूपुरशब्दमात्रमपि मे कान्ता श्रुतौ पातयेत्
पश्चादेत्य शनैः कराम्बुजवृते कुर्वीत वा लोचने ।
हर्म्येऽस्मिन्नवतीर्य साध्वसवशान्मन्दायमाना बला-
दानीयेत पदात्पदं चतुरया सख्या ममोपान्तिकम् ॥

गूढेत्यादि । स्पष्टोऽर्थः ।

१ ण उण—पाण्डुरङ्गधृतः कोशगतः पाठः ।

२ किं मुधा ठिरसोहिदो अप्पा खिन्दीअदि—टीका.

३–३ परिछिदिअ आदुरो विअ वेज्जेण—टीका. नाशोप्येवम्

उर्व० । हला इमं दाव से मणोरहं संपादइस्सं ।
सखि इमं तावदस्य मनोरथं संपादयिष्यामि ।
(पृष्ठतो गत्वा राज्ञो नयने संवृणोति)

चित्र० (विदूषकं संज्ञापयति)

राजा । (स्पर्शं रूपयित्वा) सखे नारायणोरुसंभवा सेयं वरोरूः ।

विदू० । कहं भवं अवगच्छदि ।
कथं भवानवगच्छति ।

राजा । किमत्राज्ञेयम् ।

अङ्गमनङ्गक्लिष्टं
सुखयेदन्या न मे करस्पर्शात् ।
नोच्छ्वसिति तपनकिरणै-
श्चन्द्रस्येवांशुभिः कुमुदम् ॥१६॥

उर्व० । (हस्तावपनीय उत्तिष्ठति । किंचिदपसृत्य) जेदु जेदु महाराओ
जयतु जयतु महारराजः ।

राजा । सुन्दरि स्वागतम् । (एकासने उपवेशयति)

चित्र० । अवि सुहं वअस्सस्स ।
अपि सुखं वयस्यस्य ।

राजा । नन्वेतदुपपन्नम् ।

उर्व० । हला देवीए दिण्णो महाराओ । तदो से पणअवदी विअ
सखि देव्या दत्तो महाराजः । ततोऽस्याः प्रणयवती इव
सरीर-संपक्कं गदम्हि । मा खु मं पुरोभाइणिं समत्थेहि ।
शरीरसंपर्कं गतास्मि । मा खलु मां पुरोभागिनीं समर्थयस्व ।

---

अङ्गमनङ्गमिति । स्पष्टोर्थः । अत्र सांचिन्त्यमानस्यार्थासिद्धेः क्रम इति सन्ध्यङ्ग-मुक्तं भवति ।

---

१ नाथस्त्वेवं पूर्वार्धं पठति—
अन्यत्कथमिव पुलकैः कलितं मम गात्रकं करस्पर्शात् ।

२–२ पिअसरीरसंगदम्हि—टीका.

३ पुरोभागिच्चि—टीका.

विदू० । कहं इह ज्जेव तुम्हाणं अत्थमिदो सुज्जो ।
कथमिहैव युवयोरस्तमितः सूर्यः ।

राजा । (उर्वशीमवलोक्य)

देव्या दत्त इति यदि
व्यापारं व्रजसि मे शरीरेऽस्मिन् ।
प्रथमं कस्यानुमते
चोरितमेतत् त्वया हृदयम् ॥१७॥

चित्र० । वअस्स णिरुत्तरा एसा । संपदं मह विण्णप्पं[1] सुणीअदु ।
वयस्य निरुत्तरा एषा । साम्प्रतं मम विज्ञाप्यं श्रूयताम् ।

राजा । अवहितोऽस्मि ।

चित्र० । वसन्ताणन्तरे उण्ह[2]-समए भअवं सुज्जो मए उवचरि[3]-
वसन्तानन्तरे उष्णसमये भगवान् सूर्यो मयोपचरि-
दव्वो । ता जहा इअं मे पिअ-सही सग्गस्स ण उक्कण्ठेदि
तव्यः । तद् यथा इयं मे प्रियसखी स्वर्गस्य नोत्कण्ठते
तहा वअस्सेण कादव्वं ।
तथा वयस्येन कर्तव्यम् ।

विदू० । किं वा सग्गे सुमरिदव्वं । ण वा अण्हीअदि ण वा
किं वा स्वर्गे स्मर्तव्यम् । न वा अश्यते न वा
पीअदि । केवलं अणिमिसहिं णअणेहिं मीणा
पीयते । केवलमनिमिषैर्नयनैः मीना
विडम्बीअन्दि ।
विडम्ब्यन्ते ।

---

देव्येत्यादि । स्पष्टोऽर्थः । अत्र देवीप्रसङ्गेन व्यवहितस्य बीजस्य पुनर्योजनादाक्षेपो नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ विण्णावणा—टीका.

२ इदु-(ऋतु-)—टीका.

३ उवासिदव्वो—टीका.

राजा । भद्रे

अनिर्देश्यसुखः स्वर्गः कस्तं विस्मारयिष्यति ।
अनन्यनारीसामान्यो दासस्त्वस्याः पुरूरवाः ॥

चित्र० । अणुगहिदम्हि । हला उव्वसि अकादरा भविअ
अनुगृहीतास्मि । सखि उर्वशि अकातरा भूत्वा
विसज्जेहि मं ।
विसर्जय माम् ।

उर्व० । (चित्रलेखां परिष्वज्य) सहि मा खु मं विसुमरेहि ।
सखि मा खलु मां विस्मर ।

चित्र० । (सस्मितम्) वअस्सेण संगदा तुमं एव्व एदं मए जाचिदव्वा[1]
वयस्येन संगता त्वमेव एतद् मया याचितव्या ।
(राजानं प्रणम्य निष्क्रान्ता)

विदू० । दिट्ठिआ मणोरह-संपत्तीए वड्ढदि भवं ।
दिष्ट्या मनोरथसंपत्त्या वर्धते भवान् ।

राजा । इयं तावद् वृद्धिर्मम । पश्य ।

सामन्तमौलिमणिरञ्जितशासनाङ्क-
मेकातपत्रमवनेर्न तथा प्रभुत्वम् ।
अस्याः सखे चरणयोरहमद्य कान्तम्
आज्ञाकरत्वमधिगम्य यथा कृतार्थः ॥१६॥

उर्व० । णत्थि मे विहवो अदो पिअदरं मन्तिदुं ।
नास्ति मे विभवः अतः प्रियतरं मन्त्रयितुम् ।

राजा । (उर्वशीं हस्तेनावलम्ब्य) अहो विरुद्धसंवर्धन ईप्सितलाभो नाम ।

पादास्त एव शशिनः सुखयन्ति गात्रं
बाणास्त एव मदनस्य ममानुकूलाः ।

---

अनिर्देश्यसुख इत्यादि । स्पष्टोर्थः ।

सामन्तत्यादि । स्पष्टोर्थः ।

---

१ भविदव्वा—टीका.

संरम्भरूक्षमिव सुन्दरि यद्यदासीत्[1]

त्वत्संगमेन मम तत्तदिवानुनीतम् ॥२०॥

उर्व० । अवरध्धम्हि चिरकारिआ अज्जउत्तस्स ।

अपराद्धास्मि चिरकारिका आर्यपुत्रस्य ।

राजा । मा मैवम् ।

यदेवोपनतं दुःखात्सुखं तद्रसवत्तरम् ।

निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥२१॥

विदू० । भो सेविदा पदोस-रमणीआ चन्द-वादा । समओ खु

भोः सेविताः प्रदोषरमणीयाः चन्द्रपादाः । समयः खलु

दे वास-घर-पवेसस्स ।

ते वासगृहप्रवेशस्य ।

राजा । तेन हि सख्यास्ते मार्गमादेशय ।

विदू० । इदो इदो भवदी । (इति निष्क्रामन्ति)

इत इतो भवती ।

राजा । सुन्दरि इयमिदानीमभ्यर्थना ।

उर्व० । कहं विअ ।

कथमिव ।

राजा । अनुपनतमनोरथस्य पूर्वं

[2]शतगुणितामिव मे गता त्रियामा[2] ।

---

पादास्त एवेति । स्पष्टोर्थः ।

यदेवोपनतमिति । स्पष्टोर्थः ।

---

१ संरम्भरूक्षं रोषदारुणम्, अनुनीतं कृतसान्त्वनम् इति नाथः ।

२–२ शतगुणितामिव मे गता त्रियामा इति टीकाकृत्पाठः श्रेयस्त्वात्परिगृहीतः । पाण्डुरङ्गस्तु शतगुणितेव गता मम त्रियामा इति पठति । अत्रोभयत्र वाक्ये समानधर्मत्वेन विवक्षितं प्रसरणं न्यग्भवति । टीकाकृत्पाठ एव च विधेयत्वेन निर्देशात् साधूद्भवतीति विशदं विदुषाम् ।

यदि तु तव समागमे तथैव
प्रसरति सुभ्रु ततः कृती भवेयम् ॥२२॥

[इति निष्क्रान्ताः सर्वे ।

॥ तृतीयोऽङ्कः समाप्तः ॥

---

अनुपनतेत्यादि । अनुपनतमनोरथस्य अनुपनतः अप्राप्तः मनोरथः अभिलषितोऽर्थो येन स तथोक्तः, तस्य मे पूर्वमस्मात्समागमात् प्रथमं त्रियामा रात्रिः शतगुणितां शतगुणित्वं गतेव प्राप्तेव । एका रात्रिः शतरात्रितुल्यकालतां गतेत्यर्थः । हे सुभ्रु[1] इदानीं तव समागमे सत्यपि सा रात्रिः तथैव शतगुणैव प्रसरति यदि प्रयाति चेत् ततस्तस्माद्धेतोः कृती कृतार्थो भवेयम् । अत्रेयं सूचना उत्तराङ्क[2]कथोपयोगित्वाद्बिन्दुरित्यवगन्तव्यम् ॥२२॥

॥ इति निष्क्रान्ताः सर्वे ॥

इति काटवयवेमभूपविरचिते कुमारगिरिराजीये
विक्रमोर्वशीयव्याख्याने
तृतीयोऽङ्कः ॥

---

१ सुभ्रु इत्यत्र भ्रूशब्दस्योवङ्स्थानीयत्वात् 'नेयङुवङ्स्थानावस्त्री' इति नदीसंज्ञाप्रतिषेधात् 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वं नास्ति इति ह्रस्वः प्रामादिक इति केचित् । अन्ये तु 'अप्राणिजातेश्चारज्ज्वादीनाम्' इत्यत्र अलाबूः कर्कन्धूः इत्यूकारान्तादप्यूङ्प्रत्ययमुदाजहार भाष्यकारः । एतस्मादेव ज्ञापकात्क्वचिदूकारान्तस्याप्यूङन्तत्वान्नदीत्वे ह्रस्वत्वमित्याहुः । अत एवाह वामनः 'ऊकारान्तादप्यूङ् प्रवृत्तेः' इति कुमारे ( ५ । ४३ ) श्लोकटीकायां मल्लिनाथः ।

२ उत्तराङ्कोप°—क, ख.

# अथ चतुर्थोऽङ्कः ।

( ततः प्रविशति विमनस्का चित्रलेखा सहजन्या च )

सह० । ( चित्रलेखां विलोक्य ) सहि मिलाअमाण-सदवत्तस्स
सखि म्लायमानशतपत्रस्य
विअ दे मुहस्स छाआ हिअअस्स अस्सत्थदं
इव ते मुखस्य च्छाया हृदयस्य अस्वस्थतां
सूएदि । ता कहेहि णिव्वेद[1]-कारणं । सम-दुक्खा
सूचयति । तत् कथय निर्वेदकारणम् । समदुःखा
भविदुं इच्छामि ।
भवितुमिच्छामि ।

चित्र० । अच्छरा-वार-पज्जाएण इह भअवदो सुज्जस्स
अप्सरोवारपर्यायेण इह भगवतः सूर्यस्य
पादमूलोवट्ठाणं[2] वट्टेदित्ति बलिअं खु उव्वसीए
पादमूलोपस्थानं वर्तत इति बलवत् खलु उर्वश्या
उक्कण्ठिदह्मि ।
उत्कण्ठितास्मि ।

सह० । जाणे वो अण्णोण्णं[3]-सिणेहं । तदो तदो ।
जाने युवयोरन्योन्यस्नेहम् । ततस्ततः ।

चित्र० । तदो इमाइं दिवसाइं को णु खु से[4] वुत्तन्तोत्ति
तत एतेषु दिवसेषु को नु खल्वस्या वृत्तान्त इति

---

अथ चतुर्थाङ्कः ।

कविरिदानीमान्तरमङ्कारभमाणः कथासंघटनार्थं प्रथमं प्रवेशकं नामार्थोपक्षेपकं प्रस्तौति—ततः प्रविशतीत्यादि ।

---

१ णिव्वुदि०—टीका.

२ ०वट्ठाणे वट्टन्ती—टीका.

३ अण्णोण्ण-गदं वो सिणेहं—टीका.

४ इवि नाधरत् पाण्डुरङ्गः । इदं च नोपेक्ष्यमिति वचनं नापेक्षते।

पणिधाण-ट्ठिदाए[1] मए[1] अच्चाहिदं उवलध्धं ।
प्रणिधानस्थितया मया अत्याहितमुपलब्धम् ।

सह० । (सावेगम्) कीरिसं विअ ।
कीदृशमिव ।

चित्र० । उव्वसी किल[2] तं[2] रदि-सहाअं राएसिं अमच्चेसु
उर्वशी किल तं रतिसहायं राजर्षिम् अमात्येषु
णिवेसिद-रज्ज-धुरं गेण्हिअ गन्धमादण-वणं विहरिदुं
निवेशितराज्यधुरं गृहीत्वा गन्धमादनवनं विहर्तुं
गदा ।
गता ।

सह० । सो णाम संभोओ जो तारिसेसु पदेसेसु । तदो तदो ।
स नाम संभोगो यः तादृशेषु प्रदेशेषु । ततस्ततः ।

चित्र० । तहिं खु मन्दाइणीए पुलिणेसु गदा सिअदा-
तत्र खलु मन्दाकिन्याः पुलिनेषु [3]गता सिकता-
पव्वद-केलीहिं कीलमाणा विज्जाधर-दारिआ उदयवदी
पर्वतकेलिभिः[3] क्रीडन्ती विद्याधरदारिका उदयवती
णाम देण राएसिणा णिज्झाइदत्ति कुविदा उव्वसी ।
नाम तेन राजर्षिणा निध्यातेति कुपिता उर्वशी ।

सह० । होदव्वं । दूरारूढो खु पणओ असहणो । तदो तदो ।
भवितव्यम् । दूरारूढः खलु प्रणयोऽसहनः । ततस्ततः ।

चित्र० । तदो भट्टिणो अणुणअं अपडिवज्जमाणा गुरु-साव-
ततो भर्तुरनुनयमप्रतिपद्यमाना गुरुशाप-

---

गन्धमादनो नाम हिमवत्पुरस्यौषधिप्रस्थस्योपवनम् । तथा चोक्तं कुमारसंभवे—
यस्य चोपवनं बाह्यं सुगन्धिर्गन्धमादनः । इति ॥

---

१ ०दिट्ठाए ताए—टीका.
२–२ कीडिदुं—टीका.
३–३ इति न धृतम्—टीका.

संमूढ-हिअआ इत्थिआ-जण-परिहरणिज्जं कुमारवणं[1]
संमूढहृदया स्त्रीजनपरिहरणीयं कुमारवनं
पइट्ठा। पवेसाणन्तरं च काणणोवन्तवत्ति-लदाभावेण
प्रविष्टा। प्रवेशानन्तरं च काननोपान्तवर्ति-लताभावेन[2]
परिणदं से रूवं।
परिणतमस्या रूपम्।

सह०। णत्थि विहिणो अलङ्घणिज्जं। तस्स अणुराअस्स
नास्ति विधेरलङ्घनीयम्। तस्य अनुरागस्य
अअं णाम एक्क-वदे ईरिसो अणत्थो। अह किमवत्थो
अयं नाम एकपद ईदृशो ऽनर्थः। अथ किमवस्थः
सो राएसी।
स राजर्षिः।

चित्र०। तस्सिं एव्व काणणे पियदमं विचिणन्तो अहोरत्ते[3]
तस्मिन्नेव कानने प्रियतमां विचिन्वन्नहोरात्राणि
अदिवाहेदि। इमिणा उण णिव्वुदाणंपि उक्कण्ठा-
अतिवाहयति। एतेन पुनर्निर्वृतानामपि उत्कण्ठा-
कारिणा मेहोदएण अणत्थाहीणो हविस्सदि।
कारिणा मेघोदयेन [4]अनर्थाधीनो[4] भविष्यति।

सह०। सहि तारिसा आकिदि-विसेसा चिरं दुक्ख-भाइणो
सखि तादृशा आकृतिविशेषाश्चिरं दुःख-भागिनो
ण होन्ति। अवस्सं किंपि अणुग्गहे-णिमित्तं[5]
न भवन्ति। अवश्यं किमपि अनुग्रहनिमित्तं

---

१ इत्थिआणं—टीका.

२ कारणन्तरणिव्वत्तिणा (कारणान्तरनिर्वर्तिना)—टीका.

३ अहोरत्तं वट्टदि—टीका.

४ को णाम से अवत्थो—टीका.

५ अणुग्गहित्तअं—टीका.

भूओवि समाअम-कारणं हविस्सादि । ता एहि
भूयोपि समागमकारणं भविष्यति। तद् एहि
उदउम्मुहस्स भअवदो सुज्जस्स उवट्ठाणं करेह्म ।
उदयोन्मुखस्य भगवतः सूर्यस्य उपस्थानं कुर्वः ।

[ इति निष्क्रान्ते ।

( प्रवेशकः )

( ततः प्रविशति उन्मत्तवेषो राजा )

राजा । आः दुरात्मन् रक्षस्तिष्ठ तिष्ठ क्व मे प्रियतमामादाय गच्छसि । हन्त शैलशिखराद् गगनमुत्पत्य बाणैर्मामभिवर्षति । ( विभाव्य )

नवजलधरः संनद्धोयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न नाम शरासनम् ।
अयमपि पटुर्धारासारो न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी ॥१॥

---

भूयोपि समागमकारणं भविष्यति । अत्र समागमस्यावश्यम्भावित्वनिश्चयान्नियताप्तिरिति चतुर्थ्यवस्था सूचिता ।

ततः प्रविशतीत्यादि । आ इति कोपे । क्व मे प्रियतमामादाय गच्छसीत्यत्र गम्यमानस्य बीजस्य नियताप्तिसमन्वयादवमर्शसन्धिरिति मन्तव्यम् ।

**नवजलधर** इत्यादि । सन्नद्धः सन्नाहवान् अयं पुरोवर्ती नवजलधरः नूतनमेघ एव । दृप्तनिशाचरः दृप्तः उद्धतः स चासौ निशाचरश्च स[1] न भवति । दूराकृष्टमिदं पुरोवर्ति सुरधनुः इन्द्रायुधमेव । शरासनं कार्मुकं न भवति नाम । नामेति संभावनायाम् । पटुस्तीव्रः अयं पुरोवर्त्यपि[2] धारासारः धारासंपात एव । बाणपरम्परा न भवति । कनकनिकषस्निग्धा कनकस्य सुवर्णस्य निकषो [3]घृष्टरेखा तद्वत् स्निग्धा रुचिरा इयं पुरोवर्तिनी च तडित्सौदामिन्येव । मम प्रिया उर्वशी न भवति ॥१॥

---

१ इति न धृतम्—क.

२ ०वर्ती—क.

३ घृष्ट०—क.

( विचिन्त्य ) क्व नु खलु रम्भोरूर्गता स्यात् ।

तिष्ठेत्कोपवशात् प्रभावपिहिता[1] दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोपि न च मे शक्ताः पुरोवर्तिनीं ।
सा चात्यन्तमदर्शनं नयनयोर्यातेति कोयं विधिः ॥

( दिशोवलोक्य सनिश्वासम् ) अये परावृत्तभागधेयानां दुःखं दुःखानुबन्धि । कुतः

अयमेकपदे तया वियोगः
प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभि-
र्भवितव्यं च निरातपर्द्धिरम्यैः ॥३॥

( विहस्य ) मुधैव खलु मनसः परितापवृद्धिरुपेक्ष्यते । यथा मुनयोपि व्याहरन्ति राजा कालस्य कारणमिति । तत् किमहं जलदसमयं न प्रत्यादिशामि । अथ वा प्रावृषेण्यैरेव लिङ्गैर्मम राजोपचारः संप्रति । कथमिव ।

विद्युल्लेखाकनकरुचिरं श्रीवितानं ममाभ्रं
व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि ।

---

तिष्ठेत्कोपवशादिति । स्पष्टोर्थः । तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीमित्यनेन स्वशक्तिकथनाद् व्यवसायो नाम सन्ध्यङ्गमुक्तं भवति ।

अयमेकपदे इत्यादि । एकपदे एकस्थाने । एकक्षण इत्यर्थः । निरातपर्द्धिरम्यैः निर्गता आतपस्य ऋद्धिः सामग्री येषां तानि तथोक्तानि तानि च[2] तानि रम्याणि च[2] तैरहोभिर्दिनैः भवितव्यम् भाव्यम् ॥३॥

विद्युल्लेखेत्यादि । विद्युल्लेखाकनकरुचिरं विद्युदेव लेखारूपं कनकं तेन रुचिरम् ।

---

१ प्रभावपिहिता तिरस्करिण्यादिविद्याप्रभावेणाच्छन्ना—इति नाथः ।

२–२ इति नास्ति—ग, घ.

घर्मच्छेदात् पटुतरगिरो बन्दिनो नीलकण्ठा
धारासारोपनयनपरा नैगमाः सानुमन्तः ॥४॥

भवतु। किमेवं परिच्छदश्लाघया । यावदस्मिन् कानने तां प्रियामन्वेषयामि । ( विलोक्य ) हन्त व्यवसितस्य मे संदीपनमिव संवृत्तम्। कुतः

आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः ।
कोपादन्तर्बाष्पे स्मरयति मां लोचने तस्याः ॥५॥

इतो गतेति कथं नु तत्रभवती मया सूचयितव्या।

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री
मेघाभिवृष्टसिकतासु वनस्थलीषु ।
पश्चान्नता गुरुनितम्बतया ततोऽस्या
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का ॥६॥

( परिक्रम्य अवलोक्य च सहर्षम् ) उपलब्धमुपलक्षणं येन तस्याः कोपनाया मार्गोऽनुमीयते ।

हृतोष्ठरागैर्नयनोदबिन्दुभि-
र्निमग्ननाभेर्निपतद्भिरङ्कितम् ।
च्युतं रुषा भिन्नगतेरसंशयं
शुकोदरश्याममिदं स्तनांशुकम् ॥७॥

---

अभ्रं मेघः मम श्रीवितानं श्रीमद्वितानम् । नैगमाः वणिजः । नागरौ वणिग्नैगमौ समौ इत्यमरः ॥४॥

आरक्तराजिभिरित्यादि । स्पष्टोर्थः ।

पद्भ्यामित्यादि । स्पष्टोर्थः ।

उपलक्षणमुपलक्षकम् । उपलब्धं प्राप्तम् ।

हृतोष्ठरागैरित्यादि । स्पष्टोर्थः ।

---

१ नैगमः क्षुरेवदान्तवणिग्वाणिज्यनागरे—इति विश्वः ।

(विभाव्य) कथम्। सेन्द्रगोपं नवशाद्वलमिदम्। कुतो नु खलु निर्जने वने प्रियाप्रवृत्तिरवगमयितव्या। (दृष्ट्वा) अये आसारोच्छ्वसितशैलेयस्थलीपाषाणमारूढः

आलोकयति पयोदान्
प्रबलपुरोवाततांडितशिखण्डः।
केकागर्भेण शिखी
दूरोन्नमितेन कण्ठेन ॥८॥

(उपेत्य) यावदेनं पृच्छामि।

नीलकण्ठ ममोत्कण्ठा[1] वनेऽस्मिन् वनिता त्वया।
दीर्घापाङ्गा सितापाङ्ग दृष्टा दृष्टिक्षमा भवेत् ॥९॥

कथमदत्त्वा प्रतिवचनं नर्तितुं[2] प्रवृत्तः[3]। किं नु खलु हर्षकारणमस्य (विचिन्त्य) भवतु विदितमेतत्।

मृदुपवनविभिन्नो मत्प्रियाविप्रणाशाद्
घनरुचिरकलापो निःसपत्नोऽस्य जातः।
रतिविगलितबन्धे केशहस्ते सुकेश्याः
सति कुसुमसनाथे किं करोत्येष बर्ही ॥१०॥

आलोकयतीत्यादि। कण्ठेनेत्युपलक्षणे तृतीया ॥८॥

नीलकण्ठेत्यादि। उत्कण्ठामुत्कलिकाम्। प्रियादर्शनौत्सुक्यमित्यर्थः। हर अपनय। दृष्टिक्षमा दर्शनयोग्या। दृष्टा भवेदित्यत्र काकुरनुसन्धेया ॥[3]९॥

प्रवृत्तः नर्तितुं प्रक्रान्तः। आदिकर्मणि क्तः कर्तरि चेति क्तप्रत्ययः।

मृदुपवनेत्यादि। मत्प्रियाविप्रणाशात्[4] मम प्रियाया विप्रणाशात् तिरोधानात्। 'नाशः क्षये तिरोधाने' इत्यमरः ॥१०॥

१ हरोत्कण्ठाम्—टीका. २ प्रनृत्तः—टीका.

३ अत्र नीलकण्ठेत्यादिश्लोके नाथव्याख्या—सितापाङ्ग धवलदृगन्त नीलकण्ठ मयूर। अस्मिन्वने दीर्घापाङ्गा आकर्णपूर्णनयनान्ता। दृष्टिक्षमा दृष्टौ दर्शने क्षमा दर्शनयोग्या...दृष्टा भवेदिति ममोत्कण्ठाऽस्ति।

४ अत्र विनाशशब्दोऽमङ्गलव्यञ्जकत्वादश्लील इति प्रकाशकृत्प्राकाशयदिदं पद्यं पददोषेषु। तत्र पूर्वश्लोके दृष्टिक्षमेत्यत्र जीवितसन्देहस्योक्तत्वात्कथमदत्त्वैव प्रतिवचन-

भवतु । परव्यसनानिर्वृतं न खल्वेनं पृच्छामि । (परिक्रम्य) इयमातपान्तसंधुक्षितमदा जम्बूविटपमध्यास्ते परभृता । विहङ्गमेषु पण्डिता जातिरेषा । यावदेनामभ्यर्थये ।

त्वां कामिनो मदनदूतिमुदाहरन्ति
मानावभङ्गनिपुणं त्वममोघमस्त्रम् ।
तामानय प्रियतमां मम वा समीपे
मां वा नयाशु कलभाषिणि यत्र कान्ता ॥११॥

किमाह[1] भवती । कथं त्वामेवमनुरक्तं विहाय गतेति । शृणोतु भवती ।

कुपिता न तु कोपकारणं
सकृदप्यात्मगतं स्मराम्यहम् ।

---

परव्यसननिर्वृतं परदुःखसुखितम् एनं मयूरं न प्रक्ष्यामि खलु । अनेन दोषस्य प्रख्यापितत्वादपवादो नाम सन्ध्यङ्गमुक्तं भवति । आतपात्यये वर्षागमे सन्धुक्षितमदा सन्दीपितमदा ।

त्वां कामिनामित्यादि । मदनदूतिं मन्मथदूतिकाम् । दूतिशब्द[2] इकारान्तोऽप्यस्ति । तथा चोक्तं रघुवंशे—'तेन दूतिविदितं निषेदुषा' इति । 'एत्य दूतिकृतमार्गदर्शन' इति च । अमोघमनिरर्थकम् । साधकमित्यर्थः । अस्त्रमायुधम् । कामस्येति शेषः ॥११॥

कुपितेत्यादि । कुपिता रुष्टा सकृदपि एकवारमपि आत्मकृतं कोपकारणं तु न स्मरामि । असति कोपकारणे कथं कुपितेत्याह । योषितां रमणेषु प्रियेषु प्रभुता स्वाम्यं

---

मित्यत्र प्रतिवचनाप्रदानपुरःसरं नर्तनारम्भाज्जीवितसन्देहस्य तावदवस्थानादेतस्मिन्नेव च पद्ये 'निःसपत्नोऽस्य जातः' इति सिद्धवदुक्तत्वाद्राज्ञश्चोन्मादातिशयरूपप्रकृष्टतरकारणवशाद्विप्रलम्भपोषकृदेवैतत्पदमिति न काश्चित्तदुक्तदोषलेशावकाश इति प्रतिभाति इति नाथः ।

१ इदमाकाशभाषितम् । तल्लक्षणं यथा—
किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।
श्रुत्वेवानुक्तमप्येतत्तत्स्यादाकाशभाषितम् ॥

२ 'दूतिर्दूती च दूतिका' इति रूपचिन्तामणिः इति नाथः । ङीबन्तस्यापि दूतीशब्दस्य छन्दोभङ्गभयाद् ह्रस्वः । अपि माषं मषं कुर्याच्छन्दोभङ्गं त्यजेद्गिरम् । इति केचित् । उणादयो बहुलमिति बहुलग्रहणाद् ह्रस्वः । इति वल्लभः । इति रतिदूतिपदेषु कोकिलाम् (४।१६) इत्यत्र कुमारसम्भवटीकायां मल्लिनाथः ।

प्रभुता रमणेषु योषितां
न हि भावस्खलितान्यपेक्षते ॥१२॥

कथं कथाच्छेदकारिणी स्वकार्य एव सक्ता ।

महदपि परदुःखं शीतलं सम्यगाहुः
प्रणयमगणयित्वा यन्ममापद्गतस्य ।
अधरमिव मदान्धा पातुमेषा प्रवृत्ता
फलमभिमुखपाकं राजजम्बूद्रुमस्य ॥१३॥

एवं गतेपि प्रियेव मे मञ्जुस्वनेति न कोपोस्याम् । इतो वयम्-(परिक्रामितकेन । कर्णं दत्त्वा) अये दक्षिणेन[1] प्रियाचरणनिक्षेप-शंसी नूपुररवः । यावदत्र गच्छामि (परिक्रम्य) अहो धिक् धिक् ।

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसाम् ।
कूजितं राजहंसानां नेदं नूपुरशिञ्जितम्[2] ॥१४॥

भाव[3]स्खलितानि भावस्य प्रेम्णः स्खलितानि चलनानि नायिकान्तरदर्शनादीनि नापेक्षते नाकाङ्क्षति । कारणाभावेऽपि तासां कोपः संपद्यत इत्यर्थः ॥१२॥

महदपीत्यादि । महदपि बहुलमपि परदुःखं परव्यथा सम्यक् साधु शीतलं अनुष्णम् । उद्वेजकं न भवतीत्यर्थः । अन्यस्येति शेषः । आहुः[4] ब्रुवन्ति । लौकिका इति शेषः । यद् यस्माद् आपद्गतस्य मम प्रणयं प्रार्थनाम् अगणयित्वा अनादृत्य मदान्धा एषा परभृता राजजम्बूद्रुमस्य जम्बूविशेषस्य अभिमुखपाकम् अभिमुखः पाको यस्य तत्तथोक्तं तत्फलम् अधरमिव पातुं प्रवृत्ता उद्युक्ता ॥१३॥

मेघश्यामेत्यादि । स्पष्टोऽर्थः ।

---

१ दक्षिणेनेत्येनप्प्रत्ययान्तो निपातः ।

२ स्वनिते वस्त्रपर्णानां भूषणानां च शिञ्जितम् । इत्यमरः ।

३ अत्र रङ्गनाथः—रमणेषु प्रियेषु योषितां स्त्रीणां प्रभुता प्रभुत्वं भावस्खलितान्य-भिप्रायस्खलितानि नापेक्षते नेच्छति । अभिप्रायस्यान्यथाभावे ताः कुप्यन्ति किमुतान्यथाचरण इति भावः, इति व्याचष्टे ।

४ इमं प्रथमचरणमन्यथा व्याख्याति नाथः, तद्यथा—
लोका हि महदपि परकीयं दुःखं कष्टं शीतलमिति यद्वदन्ति तत्सम्यक् समीचीन-मित्यर्थः ।

x एतन्मूला स्मृतिः—
बह्वर्थेष्वभियुक्तेन सर्वत्र व्यपलापिना ।
विभावितैकदेशेन देयं यदभियुज्यते ॥



भवतु । यावदेते मानसोत्सुकाः पतत्रिणः सरसो नोत्पतन्ति तावदेतेभ्यः प्रियाप्रवृत्तिरवगमयितव्या । (उपेत्य) भो भो जल-विहंगमराज ।

पश्चात्सरः प्रति गमिष्यसि मानसं तत्
पाथेयमुत्सृज बिसं ग्रहणाय भूयः ।
मां तावदुद्धर शुचो दयिताप्रवृत्त्या
स्वार्थात् सतां गुरुतरा प्रणयिक्रियैव ॥१५॥

यथोन्मुखो विलोकयति मानसोत्सुकेन मया न लक्षिते-त्येवं वचनमाह ।

यदि हंस गता न ते नतभ्रूः
सरसो रोधसि दर्शनं प्रिया मे ।
मदखेलपदं[1] कथं नु तस्याः
सकलं चोर गतं त्वया गृहीतम् ॥१६॥

× हंस प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता ।
विभावितैकदेशेन देयं यदभियुज्यते ॥१७॥

---

पश्चात्सर इत्यादि । पाथेयं पथि हितं । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञ् प्रत्ययः । बिसं मृणालं भूयो ग्रहणाय पुनर्ग्रहणार्थम् उत्सृज त्यज । गृहीतं बिसमुत्सृज्य ममोत्तरं दत्त्वा पश्चाद् गृहाण इत्यर्थः । दयिताप्रवृत्त्या प्रियावार्तया हेतुना मां शुचः शोकात् उद्धर उत्तारय । अत्रार्थान्तरमाह—सतां सज्जनानां स्वार्थात् स्वकार्यात् प्रणयिक्रियैव प्रणयिनां प्रार्थयितॄणां क्रियैव कार्यनिर्वर्तनमेव गुरुतरा श्रेष्ठतरा ॥१५॥

यदि हंसेत्यादि । स्पष्टोऽर्थः । अत्र तर्जनस्य गम्यमानत्वाद् द्युतिर्नाम सन्ध्यङ्गमुक्तं भवति ।

हंसेत्यादि । हे हंस मे कान्तां प्रियां प्रयच्छ अर्पय । अर्पणे कारणमाह—यस्मादस्या गतिः गमनं त्वया हृता गृहीता । तस्मात्प्रयच्छेति संबन्धः । गतिमात्र-हरणे सर्वा कान्ता कथमर्पयितव्येत्याशङ्क्यास्मिन्नर्थे न्यायमाह—यद् यद् द्रव्यम्

---

१ मदेन खेला कामक्रीडा येषु ( इति नाथः ) तानि मदखेलानि । मदखेलानि पदानि यस्मिंस्तद्गतं मदखेलपदम् ।

(विहस्य) एष चोरानुशासी राजेति भयादुत्पतितः ।
(परिक्रम्य) अयमिदानीं प्रियासहायश्चक्रवाकः । तावदेनं पृच्छामि ।
रथाङ्गनामन् वियुतो रथाङ्गश्रोणिबिम्बया ।
अयं त्वां पृच्छति रथी[1] मनोरथशतैर्वृतः ॥१८॥
कथं कः क इत्याह । मा[2] तावत् । न खलु विदितोहमस्य ।
सूर्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं वृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः ॥१९॥

---

अभियुज्यते ऽनेन गृहीतमिति निर्दिश्यते । अभियोक्तेति शेषः । तत् सर्वं द्रव्यं विभावितैकदेशेन[3] विभावितोऽङ्गीकारितः एकदेशः हृतद्रव्यैकदेशो यस्य स तथोक्तः तेन चोरेण देयम् अभियोक्त्रे प्रत्यर्पणीयम् ।

तथा चोक्तं याज्ञवल्क्येन,—

निह्नुतेऽभिहितं नैकमेकदेशविभावितः ।
दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः ॥१७॥ इति ॥

रथाङ्गनामन्नित्यादि । स्पष्टोर्थः ।

क कः इति चक्रवाकरुतानुकरणम् । एतदस्य स्वाभाविकमिति अज्ञात्वा त्वं कः क इत्येष मामधिक्षिपतीत्याशङ्कते ।

अये तावदित्यादि । अहमस्य चक्रवाकस्य तावन्न विदितः न ज्ञातः । अत्र काकुरनुसन्धेया ।

सूर्याचन्द्रमसावित्यादि । यस्य मे सूर्याचन्द्रमसौ मातामहपितामहौ[4] सूर्यो मातामहः चन्द्रः पितामहः । किञ्च योऽहमुर्वश्या च भुवा च द्वाभ्यां स्वयं वृतः आत्मनैव स्वीकृतः पतिः प्रियः । 'धवः प्रियः पतिर्भर्ता' इत्यमरः । सोऽहमिति

---

१ रथी रथवान् महारथो वा—इति नाथः ।

२ अये—टीका.

३ विभावितो दृष्टः एकदेशश्चोरितद्रव्यांशो यस्मिन्—इति नाथः । यदभियुज्यते स्वामिना चोरे चोरितत्वेनारोप्यते इति च सः ।

४ कृतयुगादौ सूर्यनप्ता मनोः पुत्रः सुद्युम्नापरनामा इलो नाम राजा मृगयासङ्गादूरनिवारितमुमावनमेकाकी प्रविष्टमात्रः स्त्री बभूव । तामेकाकिनीं सुन्दरीं दृष्ट्वा बुधः कामातुरः स्वाश्रमं नीत्वा तस्यां पुरूरवसं पुत्रमजीजनत्—इति भविष्योत्तरपुराणकथाप्रथा इति नाथः ।

कथं तूष्णीं स्थितः । भवतु । उपालप्स्ये तावदेनम् ।

सरसि नलिनीपत्रेणापि त्वमावृतविग्रहां
ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः ।
इति च भवतो जायास्नेहात् पृथक्स्थितिभीरुता
मयि च[1] विधुरे भावः कान्ताप्रवृत्तिपराङ्मुखः ॥२०॥

सर्वथा मदीयानां भागधेयानां विपर्ययेण प्रभावप्रकाशः । यावदन्यमवकाशमवगाहे । ( पदान्तरे स्थित्वा ) भवतु न तावद् गच्छामि ।

इदं रुणद्धि[2] मां पद्ममन्तः कूजितषट्पदम् ।
मया दष्टाधरं तस्याः ससीत्कार[3]मिवाननम् ॥२१॥

भवतु । अस्मिन्नेव कमलाध्यासिनि मधुकरे प्रणयित्वं करिष्ये । इतो गतस्यानुशयो मा भूदिति ।

---

पूर्वेण संबन्धः । सूर्याचन्द्रमसावित्यत्र देवताद्वन्द्वे चेत्यानङ् । अत्र विकत्थनाया गम्यमानत्वाद्विचलनं नाम सन्ध्यङ्गमुक्तं भवति ॥१९॥

सरसीत्यादि । सरसि कासारे नलिनीपत्रेणापि बिसिनीदलेनापि आवृतविग्रहां च्छादितदेहां सहचरीं चक्रवाकीं त्वं दूरे विप्रकृष्टे । स्थितामिति शेषः । मत्वा विरौषि ननु आक्रन्दसि खलु । भवतः तव जायास्नेहात् प्रियानुरागात् पृथक्स्थितिभीरुता[4] भिन्नदेशनिवासकातरता इति च इदं-रूपा । उक्तरूपेत्यर्थः । विधुरे वियुक्ते मयि तु[5] भावः तवाभिप्रायः कान्ताप्रवृत्तिपराङ्मुखः उर्वशीवार्ताविमुखः ॥२०॥

इदमित्यादि । स्पष्टोर्थः ।

---

१ तु—टीका.

२ रुणद्धि अग्रे गन्तुं न प्रयच्छति—इति नाथः ।

३ सीत्कारः कष्टाभिव्यञ्जकदन्तघटनाजनितशब्दानुकरणम्—इति नाथः ।

४ पृथक्स्थितिर्भिन्नावस्थानं तेन भीरुता भयशीलत्वम्—इत्यत्र नाथः ।

५ त्वद्—घ.

मधुकर मदिराक्ष्याः शंस तस्याः प्रवृत्ति-

( विभाव्य )

वरतनुरथ वा ते नैव दृष्टा प्रिया मे ।
यदि सुरभिमवाप्स्यस्तन्मुखोच्छ्वासगन्धं
तव रतिरभविष्यत् पुण्डरीके किमस्मिन् ॥२२॥

साधयामस्तावत् । ( परिक्रामितकेन ) एष नीपस्कन्धनिषण्णहस्तः करिणीसहायो नागराजस्तिष्ठति । अस्मात् प्रियोदन्तमुपलप्स्ये । ( विलोक्य ) भवतु न त्वरा कार्या ।

अयमचिरोद्गतपल्लवम्
उपनीतं प्रियकरेणुहस्तेन ।
अभिलषतु तावदासव-
सुरभिरसं सल्लकीभङ्गम् ॥२३॥

( क्षणमात्रं स्थित्वा ) हन्त कृताह्निकः संवृत्तः । भवतु पृच्छामि ।

मदकल युवेतिशशिकला
गजयूथप यूथिकाशबलकेशी ।

---

मधुकरेत्यादि । सुरभिं घ्राणतर्पणं तन्मुखोच्छ्वासगन्धम् अपास्यो यदि आस्वादयिष्यश्चेत् । अस्मिन् पुण्डरीके तव रतिः प्रीतिः अभविष्यत् किम् अजनिष्यत[3] किम् । न भवेदित्यर्थः । लिङ्निमित्ते लृङ् क्रियातिपत्तौ इति लृङ्[4] ॥२२॥

अयमचिरोद्गतेत्यादि । स्पष्टोर्थः ।

---

१ °मपास्यः—काटयवेमः पाण्डुरङ्गश्च । अत्र जलं दहतीत्यादाविव योग्यताभावात्कोशगतोप्ययं पाठो नोपादेयः । अतो रङ्गनाथधृतः पाठ इहादृतः ।

२ कलभकरोरूः—टीका.

३ इति न धृतम्—क, घ.

४ अत्र श्लोके नाथव्याख्यायां विशेषः—युवतिशशिकलेत्यनेन युवतीनां तारकात्वं शशिकलेत्यनेन च निष्कलङ्कता द्योत्यते । स्थिरयौवनत्वं तु देवतात्वादेव ।

स्थिरयौवना स्थिता ते
दूरालोके सुखालोका ॥२४॥

( सहर्षम् ) अनेन स्निग्धमन्द्रेण गर्जितेन प्रियोपलम्भशंसिना समाश्वासितोऽस्मि । साधर्म्याच्च त्वयि मे भूयसी प्रीतिः ।

[1]मामाहुः पृथिवीभृतामधिपतिं नागाधिराजो भवान्
अव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं ममाप्यर्थिषु ।
स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा
सर्वं मामनु ते प्रियाविरहजां त्वं तु व्यथां मानुभूः॥२५॥

सुखमास्तां भवान् । साधयामस्तावत् । ( पार्श्वतो दृष्टिं दत्त्वा ) अये सुरभिकन्दरो नाम विशेषरमणीयः सानुमानालोक्यते । प्रियश्चायमप्सरसाम् । अपि नाम सुतनुरस्योपत्यकायामुपलभ्येत ।

( परिक्रम्य अवलोक्य च ) हन्त मदीयैर्दुरितपरिणामैर्मेघोऽपि शतह्रदाशून्यः संवृत्तः । तथापि शिलोच्चयमेतमपृष्ट्वा न निवर्तिष्ये ।

अपि वनान्तरमल्पकुचान्तरा
श्रयति पर्वत पर्वसु संनता ।

---

मदकलेत्यादि । मदकल मदोत्कट गजयूथप कलभकरोरूः कलभस्य करिपोतस्य करवदूरू यस्याः सा तथोक्ता । ऊरूत्तरपदादौपम्ये इत्यूङ् । यूथिकाशबलकेशी यूथिकाभिः पुष्पविशेषैः शबलाः चित्राः केशा यस्याः सा तथोक्ता । स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति ङीष् ॥२४॥

मामाहुरिति । स्पष्टोर्थः ।

---

१ मामाहुरिति । विशेषेण उच्छिन्ना न भवतीत्यव्युच्छिन्ना पृथ्वी महती प्रवृत्तिरादरो यस्मिंस्तत् । पक्षे प्रवृत्तिरुद्गमो यस्य—इति नाथः ।

इदमनङ्गपरिग्रहमङ्गना
पृथुनितम्ब नितम्बवती तव ॥२६॥

कथं तूष्णीमास्ते। शङ्के विप्रकृष्टो न शृणोतीति। समीपेस्य गत्वा पुनरेनं पृच्छामि । ( परिक्रम्य )

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनोद्देशे मया विरहिता त्वया[1] ॥२७॥

( आकर्ण्य सहर्षम् ) कथं यथाक्रमं दृष्टेत्याह । भवानपि अतः प्रियतरं शृणोतु। क्व तर्हि मम प्रियतमा । ( नेपथ्ये तदेवाकर्ण्य ) हा धिक् । ममैवायं कन्दरमुखविसर्पी प्रतिशब्दः ।

( विषादं रूपयित्वा ) श्रान्तोस्मि । अस्यास्तावद् गिरिनद्यास्तीरे स्थितस्तरङ्गवातमासेविष्ये । इमां नवाम्बुकलुषामपि स्रोतोवहां पश्यतो मे रमते मनः ।

तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरसना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम् ।
यथाविद्धं या[2]ति स्खलितमभिसं[3]धाय बहुशो
नदीभावेनेयं ध्रुवमसहना सा परिणता ॥२८॥

---

अपि वनान्तरमित्यादि । पर्वसु गुल्फादिसन्धिषु सन्नता निमग्ना । निगूढग्रन्थिरित्यर्थः । अनङ्गपरिग्रहं मन्मथस्वमिदं वनान्तरमपि श्रयति भजति । अपिः प्रश्ने ॥ २६ ॥

सर्वक्षितिभृतामित्यादि । मया विरहिता त्वया दृष्टेत्यत्र प्रश्नार्थे काकुरनुसन्धेया । एतदेव प्रतिध्वनौ सति त्वया विरहिता मया दृष्टेत्युत्तरवत् प्रतिभाति च । शेषमुभयत्र समानम् ॥२७॥

तरङ्गेत्यादि । यथाविद्धम् आविद्धं कुटिलं यथा भवति तथा [4]यान्ती सेयमुर्वशी

---

१ अत्र प्रश्नवाक्यमेवोत्तरत्वेन योजितम् । त्रिगताख्यं वीथ्यङ्गं चेदम् । तथा चाह साहित्यदर्पणकृत्—

त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः । इति नाथः ।

२ यान्ती—टीका, ३ °मनुसन्धाय—टीका. ४ भ्रमन्ती—ग.

भवतु । याचिष्ये तावदेनाम् । (अञ्जलिं कृत्वा)

त्वयि निबद्धरतेः प्रियवादिनः
प्रणयभङ्गपराङ्मुखचेतसः ।
कथमपराधलवं मम पश्यसि
त्यजसि मानिनि दासजनं यतः ॥[1]२६॥

अथ वा परमार्थसरिदेवैषा । न खलूर्वशी पुरूरवसमपहाय समुद्राभिसारिणी भविष्यति । भवतु । अनिर्वेदप्राप्याणि श्रेयांसि । यावदमुमेव प्रदेशं गच्छामि यत्र मे नयनयोः सुनयना तिरोभूता । (परिक्रम्य अवलोक्य) हन्त दृष्टमुपलक्षणं तस्या मार्गस्य ।

रक्तकदम्बः सोयं
प्रियया घर्मान्तशंसि[2] यस्यैकम् ।
कुसुममसमग्रकेसर-
विषममपि कृतं शिखाभरणम् ॥३०॥

(विलोक्य) इमं तावत् प्रियाप्रवृत्तिनिमित्तं सारङ्गमासीन-मभ्यर्थये ।

---

बहुशः बहु[3] बह्वल्पार्थाच्छस्कारकादन्यतरस्यामिति शस् । स्खालितमपराधम् । ममेति शेषः । अनुसन्धाय स्मृत्वा असहना असहिष्णुः सती नदीभावेन सरिद्रूपेण परिणता विकारं गता । स्वरूपमुत्सृज्य रूपान्तरं प्राप्तेत्यर्थः । ध्रुवमित्युत्प्रेक्षायाम् ॥[4]

त्वयि निबद्धेत्यादि । स्पष्टोर्थः ।

रक्तकदम्ब इत्यादि । स्पष्टोर्थः ।

---

१ अत्र श्लोके रङ्गनाथः—निबद्धरतेर्नितरां सक्तचित्तस्य । प्रियवादिनः प्रियभाषणपरस्य । प्रणयस्य प्रीतेर्भङ्गात्पराङ्मुखं चेतोऽन्तःकरणं यस्य ।

२ रक्तकदम्बो हि वर्षासु कुसुमितो भवति—इति नाथः ।

३ इति न धृतम्—क, ग.

४ अत्र तरङ्गेत्यादिश्लोके नाथः—

यथाशब्दः कोपव्यञ्जकेषु तरङ्गेत्याद्याविद्धमित्यन्तेषु विशेषणेषु योज्यः ।

कृष्णशारच्छविर्योऽसौ दृश्यते काननश्रिया ।
वनशोभावलोकाय कटाक्ष इव पातितः ॥३१॥

( विलोक्य ) किं नु खलु मामवधीरयन्निव अन्यतोमुखः संवृत्तः । ( दृष्ट्वा )

अस्यान्तिकमायान्ती
शिशुना स्तनपायिना मृगी रुद्धा ।
तामयमनन्यदृष्टि-
र्भुग्नग्रीवो विलोकयति ॥ ३२ ॥

हंहो यूथपते

अपि दृष्टवानसि मम प्रियां वने
कथयामि ते तदुपलक्षणं शृणु ।
पृथुलोचना सहचरी यथैव ते
सुभगं तथैव खलु सापि वीक्षते ॥३३॥

कथमनादृत्य मद्वचनं कलत्राभिमुखं स्थितः । उपपद्यते । परिभवास्पदं दशाविपर्ययः । इतो वयम्—(परिक्रामितकेन अवलोक्य) शिलाभेदान्तरगतं किमेतदालोक्यते ।

---

कृष्णशार इत्यादि । कृष्णा नीला शारा कर्बुरा छविः कान्तिः यस्य स तथोक्तः यः सारङ्गो हरिणो दृश्यते, असौ काननश्रिया वनलक्ष्म्या मेघकालावलोकाय पातितः प्रसारितः कटाक्ष इव ॥३१॥

स्वस्यान्तिकमित्यादि । स्पष्टोर्थः ।

हंहो इत्यामन्त्रणे ।

अपि दृष्टवानिति । स्पष्टोर्थः ।

---

१ मेघकालाव°—टीका.

प्रभालेपी नायं हरिहतमृगस्यामिषलवः
स्फुलिङ्गः स्याद[1]ग्नेर्गहनम[2]भिवृष्टं पुनरिदम् ।

(विभाव्य)

अये रक्ताशोकस्त[3]बकसमरागो मणिरयं
यमुद्धर्तुं पूषा व्यवसित इवालम्बितकरः ॥३४॥

हरति मे मनः । आदास्ये तावदेनम् । अथवा

मन्दारपुष्पैरधिवासितायां
यस्याः शिखायामयमर्पणीयः ।
सैव प्रिया संप्रति दुर्लभा मे
किमेनमस्रोपहतं करोमि ॥३५॥

---

प्रभालेपीत्यादि । प्रभाया लेपः छुरणमस्यास्तीति स तथोक्तः । अयं पुरोवर्ती हरिहतमृगस्य आमिषलवः मांसखण्डः न भवति । तस्य प्रभालेपित्वासंभवात् । अग्नेः स्फुलिङ्गः कणो वा न भवति । वेति पक्षान्तरे । यतः यस्मात् इदं गहनं वनम् अभिवृष्टं मेघसिक्तम् । तस्मान्नेति संबन्धः ।

एवं [5]सन्दिह्य निश्चिनोति-(अये इत्यादि)

अये इत्यामन्त्रणे । रक्ताशोकप्रसवसमरागः रक्ताशोकस्य प्रसवेन कुसुमेन समो रागो रक्तिमा यस्य स तथोक्तः । अयं पुरोवर्ती मणिः पद्मरागः । उत्प्रेक्षयापि तदेव द्रढयति—पूषा सूर्यः आलम्बितकरः सन् यं मणिमुद्धर्तुम् आहर्तुं व्यवसित इव उद्युक्त इव ॥ ३४ ॥

मन्दारपुष्पैरित्यादि । स्पष्टोर्थः । अत्र भाविकार्यसूचनात्प्ररोचना नाम सन्ध्यङ्गमुक्तं भवति ॥३५॥

---

१ अत्र टीकाकृत्पाठः श्रेयस्त्वात्परिगृहीतः । पाण्डुरङ्गस्तु मूलकोशानुसारेण गगनमभिवृष्टं पुनरिदम् इति पठति । गगनस्य वर्षणक्रियायाः कर्मत्वमेव घटते कर्तृत्वं तु दुर्लभम् । तस्य पर्जन्ये नियतत्वात् । किं च । गगनस्य इदमा निर्देशोपि न बहूपयुज्यते । तद्विनापि विवक्षितार्थोपलब्धेः । इति दिक् ।

२ काटयवेमस्तु स्फुलिङ्गो वा नाग्नेर्गहनमभिवृष्टं यत इदम् । इति पठतीति प्रतीयते ।

३ ०शोकप्रसवसम०—टीका.

४ प्रसरणम०—ग. इदमसाधु ।

५ पर्युदस्य (इति पाण्डुरङ्गशोधितः पाठः)—ग.

(नेपथ्ये) वत्स गृह्यतां गृह्यताम् ।

संगमनीय इति मणिः
शैलसुताचरणरागयोनिरयम् ।
आवहति धार्यमाणः
संगममचिरात् प्रियजनेन ॥३६॥

राजा । (कर्णं दत्त्वा) को नु खलु मामेवमनुशास्ति । (दिशोवलोक्य) अये अनुकम्पते मां कश्चिन्मृगचारी मुनिर्भगवान् । भगवन् अनुगृहीतोस्म्यहमुपदेशाद् भवतः । (मणिमादाय) हंहो संगमनीय

तया वियुक्तस्य विलग्नमध्यया[2]
भविष्यसि त्वं यदि संगमाय मे ।
ततः करिष्यामि भवन्तमात्मनः
शिखामणिं बालमिवेन्दुमीश्वरः ॥३७॥

(परिक्रम्य अवलोक्य च) अये किं नु खलु कुसुमरहितामपि लतामिमां पश्यतो मे रतिरुपलब्धा । अथ वा स्थाने मनोरमा ममेयम् । इयं हि

तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद् विश्रान्तपुष्पोद्गमा ।

---

संगमनीय इत्यादि । स्पष्टोर्थः ।

मृगचर्मधारी भगवान् कश्चन मुनिः । अयं नारायण इति संप्रदायः ।

पुनस्तस्या वेदिविलग्नमध्ययेति । स्पष्टोर्थः ।

---

१ मृगचर्मधारी—टीका.

२ पुनस्तया वेदिविलग्नमध्यया—इति टीकाकृतः प्रथमचरणपाठः ।

चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा ॥३८॥

यावदस्याः प्रियानुकारिण्याः परिष्वङ्गप्रणयी भवामि ।

( इति लतामालिङ्गति )

( ततः प्रविशति तत्स्थान एवोर्वशी )

राजा । (निमीलिताक्ष एव स्पर्शं रूपयित्वा) अये उर्वशीगात्रसंपर्कादिव निर्वृतं मे शरीरम् । तथापि न पुनरस्ति विश्वासः । कुतः ।

समर्थये यत् प्रथमं प्रियां प्रति
क्षणेन तन्मे परिवर्ततेऽन्यथा ।
अतो विनिद्रे सहसा विलोचने
करोमि न स्पर्शविभावितप्रियः ॥३९॥

---

तन्वीत्यादि । तन्वी पेलवा मेघजलार्द्रपल्लवतया अश्रुभिः धौताधरेव । स्वकालविरहात् स्वेषां स्वकीयानां पुष्पाणां कालः प्रादुर्भावसमयः तस्य विरहोऽपगमः तस्माद्धेतोः विश्रान्तपुष्पोद्गमा विरतपुष्पोदया सती आभरणैः शून्येव । मधुलिहां भ्रमराणां शब्दैः ध्वनिभिः विना विनाभूता चिन्तामौनं चिन्तया कृतं मौनमास्थितेव प्राप्तेव इयं लता पादपतितं मामवधूय आक्षिप्य जातानुतापा संजातपश्चात्तापा चण्डी कोपना सा उर्वशीव लक्ष्यते हि । अत्र कार्यान्वेषणाद् विबोधनं नाम सन्ध्यङ्गमुक्तं भवति ॥३८॥

[1]यावदस्याः प्रियानुकारिण्याः परिष्वङ्गप्रणयी भवामि, इति लतामालिङ्गतीत्यत्रालिङ्गनस्योर्वशीप्राप्तेः हेतुत्वादादानं नाम सन्ध्यङ्गमुक्तं भवति[1] ।

समर्थये इत्यादि । प्रथमं पूर्वं प्रियां प्रति उर्वशीमनुसन्धाय यद्रूपं नूपुररवादिकं समर्थये भावयामि । निश्चिनोमीत्यर्थः । तद्रूपादिकं क्षणेन क्षणमात्रेण मे मम अन्यथा अन्यप्रकारेण तडिद्राजहंसरवादिरूपेण परिवर्तते परिवृत्तिं प्राप्नोतीति यत् ततः कारणात् स्पर्शविभावितप्रियः स्पर्शेन अङ्गस्पर्शेन विभाविता निरूपिता प्रिया येन स तथोक्तः । सोऽहं विलोचने नेत्रे सहसा शीघ्रं विनिद्रे उन्मीलिते न करोमि न कुर्वे ॥ ३९ ॥

---

१—१ इति न धृतम्—ग, घ.

(शनैश्चक्षुरुन्मील्य) कथं सत्यमेव प्रियतमा ।

उर्व० । (बाष्पं विसृज्य) जेदु जेदु महाराओ ।

जयतु जयतु महाराजः ।

राजा ।

त्वद्वियोगोद्भवे तन्वि मया तमसि मज्जता ।

दिष्ट्या प्रत्युपलब्धासि चेतनेव गतासुना ॥४०॥

उर्व० । अब्भन्तर-करणाए मए पच्चक्खी-किद-वुत्तन्तो खु

अभ्यन्तरकरणया मया प्रत्यक्षीकृतवृत्तान्तः खलु

महाराओ[1] ।

महाराजः ।

राजा । अभ्यन्तरकरणयेति न खलु ते वचनार्थमवैमि ।

उर्व० । कहइस्सं[2] इमं । दाव पसीददु महाराओ जं मए

कथयिष्यामि इमम् । तावत् प्रसीदतु महाराजो यन्मया

कोव-वसं गदाए एदं अवत्थन्तरं पाविदो[3] महाराओ ।

कोपवशं गतया एतदवस्थान्तरं प्रापितो महाराजः ।

राजा । कल्याणि न तावदहं प्रसादयितव्यः । त्वद्दर्शनादेव

प्रसन्नः सबाह्यान्तःकरणो ममान्तरात्मा । कथय

कथमियन्तं कालमवस्थिता मया विना भवती ।

उर्व० । सुणादु महाराओ । भअवदा कुमारेण[4] सासदं

शृणोतु महाराजः । भगवता कुमारेण शाश्वतं

---

त्वद्वियोगेत्यादि । स्पष्टोर्थः । कथयिष्यामीमम् अमुं वचनार्थम् ।

यन्मया कोपवशङ्गतया इदमवस्थान्तरमुपपादितं महाराजस्य । अत्र विरोधस्य शमनात् शक्तिर्नाम सन्ध्यङ्गमुक्तं भवति ।

---

१—१ अब्भन्तरकरणाए मह पच्चक्ख-वुत्तन्तो महाराओ—टीका.

२ कहइस्सं इत्यत्रैव वाक्यमवसाययति इमं इत्येतच्च दाव इत्यादिना समं पठति पाण्डुरङ्गः । एवं सति इमं इत्यस्य पसीददु इति क्रियायामन्वयो दुर्लभ इति नावधत्ते ।

३ उववादिदं महाराअस्स—टीका.

४ महासेणेण—टीका.

कुमारवदं गेण्हिअ अकलुसो णाम गन्धमादण-
कुमारव्रतं गृहीत्वा अकलुषो नाम गन्धमादन-
कच्छो अभ्भासिदो किदो अ एस विही ।
कच्छोऽध्यासितः कृतश्चैष विधिः ।

राजा । क इव ।

उर्व० । जा इमं पदेसं इत्थिआ पविसदि सा लदा-भावेण
या एतं प्रदेशं स्त्री प्रविशति[1] सा लता-भावेन
परिणमिस्सदि । गोरी-चरण-संभवं मणिं विणा तदो
परिणंस्यति । गौरीचरणसंभवं मणिं विना ततो
ण मुच्चिस्सेदित्ति[2] । साहं गुरु-साव-संमूढ-हिअआ
न मोच्यत इति । साहं गुरु-शाप-संमूढ-हृदया
देवदा-समअं विसुमरिअ अगहिदाणुणआ कुमार-वणं
देवतासमयं विस्मृत्य अगृहीतानुनया कुमारवनं
पविट्ठा । पवेसाणन्तरं एव्व वासन्ती लदा संवुत्ता[3] ।
प्रविष्टा । प्रवेशानन्तरम् एव वासन्ती लता संवृत्ता ।

राजा । सर्वमुपपन्नम् ।

रतिखेदसुप्तमपि मां
शयने या मन्यसे प्रवासगतम् ।
सा त्वं प्रिये सहेथाः
कथं मदीयं चिरवियोगम् ॥४१॥

---

कुमारव्रतं ब्रह्मचर्यव्रतम् ।

कृतश्चैष विधिः । विधिः नियमः ।

वासन्ती लता संवृत्तास्मि । अत्रोर्वश्या आत्मनो लताभावकथनं राज्ञा कृतस्याभ्यन्तरकरणाया ममेति न खलु ते वचनार्थमवैमीत्यस्य प्रश्नस्योत्तरमिति मन्तव्यम् ।

रतिखेदेत्यादि । स्पष्टोर्थः ।

---

१ प्रवेदयति इति पाण्डुरङ्गधृता शङ्काया चिन्त्या ।

२ मुच्चइत्ति—टीका.

३ इतोनन्तरम् 'ह्मि' इत्यधिकम्—टीका.

इदं तद् यथाकथितं त्वत्संगमनिमित्तं मुनेरुपलभ्य मणि-
प्रभावादासादिता त्वमस्माभिः । (मणिं दर्शयति)

उर्व० । अम्मो संगमणीओ । अदो खु महाराएण आलिङ्गिद-
अहो संगमनीयः । अतः खलु महाराजेन आलिङ्गित-
मेत्तव्व पकिदित्थम्हि संवुत्ता ।
मात्रैव प्रकृतिस्थास्मि संवृत्ता । (मणिमादाय मूर्धनि वहति)

राजा । एवमेव सुन्दरि क्षणमात्रं स्थीयताम् ।

स्फुरता विच्छुरितमिदं
　　रागेण मणेर्ललाटनिहितस्य ।
श्रियमुद्वहति मुखं ते
　　बालातपरक्तकमलस्य ॥४२॥

उर्व० । महन्तो खु कालो तुह पइट्ठाणादो णिग्गदस्स । असू-
महान् खलु कालस्तव प्रतिष्ठाना[2]द् निर्गतस्य । असू-
इस्संति[1] मं पकिदीओ । ता एहि णिवुत्तम्ह ।
यिष्यन्ति मह्यं प्रकृतयः । तदेहि निवर्तावहे ।

राजा । यदाज्ञापयति भवती ।

उर्व० । कहं महाराओ गन्तुम् इच्छदि ।
कथं महाराजो गन्तुमिच्छति ।

राजा ।

अचिरप्रभाविलसितैः पताकिना
　　सुरकार्मुकाभिनवचित्रशोभिना ।

---

स्फुरता विच्छुरितमित्यादि । स्पष्टोऽर्थः ।

कथं महाराजो गन्तुमिच्छति । कथमिति प्रश्ने ।

अचिरप्रभेत्यादि । अचिरप्रभाविलसितैः विद्युद्विलसनैः पताकिना पताकावता । व्रीह्यादित्वादिनिः । सुरकार्मुकाभिनवचित्रशोभिना सुरकार्मुकं शक्रधनुः अभिनवं नूतनं

---

१ असूयिष्यन्ति इति पाण्डुरङ्गः । न ह्यत्र वर्तमानकालिक्यसूयाऽभिप्रेता । किन्तर्हि भविष्यन्त्येव । तेनासाभिष्टीकाकृतः पाठोऽङ्गीकृतः ।

२ प्रतिष्ठानादिति प्रयागपूर्वतीरस्थित-भूसी-संज्ञकात्स्वनगरात्—इति नाथः ।

गमितेन खेलगमने विमानतां
नय मां नवेन वसतिं पयोमुचा ॥४३॥

[इति निष्क्रान्ताः सर्वे ।

विक्रमोर्वशीये चतुर्थोऽङ्कः समाप्तः ।

---

चित्रमालेख्यं तेन शोभत इति स तथोक्तः तेन खेलगमने अञ्चितगमने विमानतां गमितेन नवेन नूतनेन पयोमुचा मेघेन वसतिमावासम् । प्रतिष्ठाननगरमित्यर्थः । मां नय प्रापय ॥४३॥

इति निष्क्रान्तौ ।

इति श्रीकाटयवेमभूपविरचिते
कुमारगिरिराजीये
विक्रमोर्वशीयव्याख्याने
चतुर्थोऽङ्कः ।

# अथ पञ्चमोऽङ्कः ।

(ततः प्रविशति परितुष्टो विदूषकः)

**विदूषकः ।** दिट्ठिआ चिरस्स कालस्स उव्वसी-सहाओ[1] णन्दण-
दिष्ट्या चिरस्य कालस्य उर्वशीसहायो नन्दन-
वण-प्पमुहेसु[2] देवदा-रणेसु विहरिअ पडिणिवुत्तो
वनप्रमुखेषु देवतारण्येषु विहृत्य प्रतिनिवृत्तः
पिअ[3]-वअस्सो । दाणिं सं[4] सक्कारोवआरेहिं प[5]किदीहिं
प्रियवयस्यः । इदानीं स सत्कारोपचारैः प्रकृतिभिः
अणुरं[6]ज्जन्तो रज्जं करेदि । असंताणत्तणं वज्जिअ ण
अनुरज्यमानो राज्यं करोति । असंतानत्वं वर्जयित्वा न
किं वि से हीणं[7] । अज्ज तिहि-विसेसोत्ति भअवदीणं
किमपि अस्य हीनम् । अद्य तिथिविशेष इति भगवत्योः
गङ्गा-जँउणाणं संगमे देवीहिं सह किदाहिसेओ संपदं
गङ्गायमुनयोः संगमे देवीभिः सह कृताभिषेकः साम्प्रतम्
उवआरिअं पविट्ठो । ता जाव तत्तभवदो अलंकरीअ[8]-
उपकार्यां प्रविष्टः । तद् यावत् तत्रभवतः अलंक्रिय-

---

कविरिदानीमङ्कान्तरमारभमाणः कथासंघटनार्थं प्रथमं प्रवेशकं नामार्थोपक्षेपकं प्रस्तौति—ततः प्रवशितीत्यादि ।

---

१ इत्यतः परं पिअ-वअस्सो इत्यधिकम्—टीका.

२ इत्यतः परं तेसु तेसु इत्यधिकम्—टीका.

३ इति नात्र पठितं पठितपूर्वत्वात्—टीका.

४ इदं पदद्वयमेकपदेन पठतः श्रीपाण्डुरङ्गस्तदनुगः कालेमहोदयश्च । व्याख्याति च चरमनिर्दिष्टः—'सत्कारेण सहिताः ससत्कारा ये उपचाराश्चन्दनसेकपुष्पविक्षेपादयस्तैः' इति । अत्र स भवान्निरूत्ते यदेवं वाग्व्यवहारो नानुसृतो भवति । उपचाराः सत्कारार्था भवन्ति न तु सत्कारसहिताः ।

५ पकिदिओ—टीका.

६ अणुरअअन्तो—टीका.

७ वअणीयं (वचनीयम्)—टीका.

८ इत्यतः परम् अलंकरिदुं इत्यधिकम्—टीका.

माणस्स अणुलेवण-मल्ले[1] अग्ग-भागी होमि ।
माणस्य अनुलेपनमाल्ये अग्रभागी भवामि ।

(इति परिक्रामति)

(नेपथ्ये) हद्धी हद्धी । दुऊलुत्तरच्छदे ताल-वेण्टाधारे
हा धिक् हा धिक् । दुकूलोत्तरच्छदे तालवृन्ताधारे
णिक्खिविअ णीअमाणो मए भट्टिणो अब्भन्तर-
निक्षिप्य नीयमानो मया भर्तुरभ्यन्तर-
विलासिणी-मोलि-रअण-जोग्गो मणी आमिस-सङ्किणा
विलासिनी-मौलिरचनायोग्यो[2] मणिरामिषशङ्किना
गिद्धेण अक्खित्तो ।
गृध्रेण आक्षिप्तः ।

विदू० । (कर्णं दत्त्वा) अच्चाहिदं । परं बहुमदो क्खु सो वअस्सस्स
अत्याहितम्[3] । परं बहुमतः खलु स वयस्यस्य
संगमणीओ[4] णाम[5] चूडामणी । अदो क्खु असमत्त-
वयस्यस्य संगमनीयो नाम चूडामणिः । अतः खलु असमाप्त-
णेवच्छो तत्तभवं आसणादो उट्ठिअ इदो एव्व
नेपथ्यः तत्रभवान् आसनाद् उत्थाय इत एव
आअच्छदि । जाव णं उवसप्पामि ।
आगच्छति । यावदेनमुपसर्पामि ।

[इति निष्क्रान्तः ।

प्रवेशकः ।

---

तालवृन्ताधारे पटलिकाविशेषे ।

---

१ ०मल्लेषु--टीका.

२ ०मौलिरत्नयोग्य इति पाण्डुरङ्गाश्रिता च्छाया नास्मन्मनसि श्लिष्यति ।

३ अत्याहितं महाभीतिः कर्म जीवानपेक्षि च—इत्यमरः ।

४ ०णीअणामहेओ—टीका.

५ मणी—टीका.

(ततः प्रविशति सावेगपरिजनो राजा)

राजा ।

आत्मनो वधमाहर्ता क्वासौ विहगतस्करः ।
येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम् ॥१॥

किराती । एसो एसो खु मुहकोडि–लग्ग हेम-सुत्तेण मणिणा
 एष एष खलु मुखकोटिलग्नहेम-सूत्रेण मणिना
 आलिहन्तो विअ आआसं पडिब्भमदि ।
 आलिखन्निव आकाशं परिभ्रमति ।

राजा । पश्याम्येनम् ।

असौ मुखालम्बितहेमसूत्रं
 बिभ्रन्मणिं मण्डलचारशीघ्रः ।
अलातचक्रप्रतिमं विहङ्ग-
 स्तद्रागरेखावलयं तनोति ॥२॥

किं नु खलु कर्तव्यम् ।

विदू० । (उपेत्य) अलं एत्थ घिणाए । अवराही सासणीओ ।
 अलमत्र घृणया । अपराधी शासनीयः ।

राजा । सम्यगाह भवान् । धनुर्धनुस्तावत् ।

यवनी । एसा आणइस्सं ।
 एषाऽऽनेष्यामि ।

[ निष्क्रान्ता धनुर्ग्राहिणी यवनी ।

---

आत्मनो वधमित्यादि । स्पष्टोऽर्थः ।

असावित्यादि । असौ विहङ्गः पक्षी मुखालम्बितहेमसूत्रं मुखेन आलम्बितं गृहीतं हेमसूत्रं यस्य स तथोक्तः तं मणिं बिभ्रत् । मण्डलचारशीघ्रः मण्डलाकारसंचरणत्वरितः सन् तद्रागरेखावलयं तस्य मणेः रागस्य प्रभायाः लेखा राजिः तस्या वलयं मण्डलम् अलातचक्रप्रतिमम् उल्मुकवलयसदृशं यथा भवति तथा तनोति विधत्ते ॥२॥

---

१ इति नाभरत्पाण्डुरङ्गः ।

राजा । वयस्य न दृश्यते विहङ्गः ।

विद्० । इदो दक्खिणन्तेण[1] अवगदो[2] सासणीओ कुणव[3]-
इतो दक्षिणान्तेन अपगतः शासनीयः कुणप-
भोअणो ।
भोजनः ।

राजा । ( परिवृत्य अवलोक्य ) दृष्ट इदानीम् ।

प्रभापल्लवितेनासौ करोति मणिना खगः ।
अशोकस्तबकेनेव दिङ्मुखस्यावतंसकम् ॥३॥

( प्रविश्य चापहस्ता यवनी )

यवनी । भट्टा एदं हत्थावाव-सहिदं सरासणं ।
भर्तः एतद्धस्तावापसहितं शरासनम् ।

राजा । किमिदानीं धनुषा । बाणपथमतीतः क्रव्यभोजनः ।
तथा हि ।

आभाति मणिविशेषः
दूरमिदानीं पतत्रिणा नीतः ।
नक्तमिव लोहिताङ्गः
परुषघनच्छेदसंयुक्तः ॥४॥

( कञ्चुकिनं विलोक्य ) लातव्य मद्वचनादुच्यतां नागरिकः
सायं निवासवृक्षाश्रयी विचीयतां
विहगदस्युरिति ।

---

प्रभापल्लवितेत्यादि । स्पष्टोर्थः ।

हस्तावापो नाम ज्याघातवारणमुच्यते ।

आभातीत्यादि । लोहिताङ्गो भौमः ॥४॥

शकुनहतकः विहङ्गाधमः ।

---

१ दक्खिणेण—टीका.

२ अवआदो ( अपयातः )—टीका.

३ सकुणहदओ—टीका.

कञ्चुकी । यदाज्ञापयति देवः ।

[ इति निष्क्रान्तः ।

विदू० । उवविसदु भवं संपदं । कहिं[1] गदो रअण-कुम्भीलओ
उपविशतु भवान् सांप्रतम् । क गतो रत्न-कुम्भीरको
भवदो सासणादो मुच्चिस्सदि ।
भवतः शासनात् मोच्यते ।

राजा । ( विदूषकेण सहोपविश्य )

रत्नमिति न मम तस्मिन्
मणौ प्रियत्वं विहङ्गमाक्षिप्ते ।
प्रियया तेनास्मि सखे
संगमनीयेन संगमितः ॥५॥

विदू० । णं[2] परिगदत्थो म्हि किदो भवदा ।
ननु परिगतार्थोऽस्मि कृतो भवता ।

( ततः प्रविशति सशरं मणिमादाय कञ्चुकी )

कञ्चु० । जयतु जयतु देवः ।
अनेन निर्भिन्नतनुः[3] स वध्यो
बलेन ते मार्गणतां गतेन ।

---

उपविशतु भवान् सांप्रतं कुत्र गच्छति स रत्नकुम्भीलकः भवतः शासनान्न मुच्यते ।

रत्नमित्यादि । स्पष्टोर्थः ।

अनेनेत्यादि । वध्यः स पतत्री पक्षी मार्गणतां[4] बाणत्वं गतेन अनेन ते बलेन सामर्थ्येन । स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोरित्यमरः । निर्भिन्नवपुः

---

१ टीकाकृत्त्वेवं पठति—कहिं गच्छदि सो रअण-कुम्भीलओ । भवदो सासणादो न मुच्चदि—टीका.

२ णं पढमं एव्व—टीका.

३ °वपुः—टीका.

४ इत्यतः परं बाणताम् इत्याधिकम्–ग. इदं चोपेक्ष्यम् ।

प्राप्यापराधोचितमन्तरिक्षात्
समौलिरत्नः पतितः पतत्त्री ॥६॥

( सर्वे विस्मयं रूपयन्ति )

कञ्चु० । अद्भिः प्रक्षालितो मणिः कस्मै प्रदीयताम् ।

राजा । किराति अग्निशुद्धमेनं कृत्वा पेटकं प्रवेशय ।

किराती । जं भट्टा आणवेदि । (इति मणिं गृहीत्वा निष्क्रान्ता)
यद् भर्ता आज्ञापयति ।

राजा । लातव्य अपि जानीते भवान् कस्यायं बाण इति ।

कञ्चु० । नामाङ्कितो दृश्यते न तु मे वर्णविचारक्षमा दृष्टिः ।

राजा । तेन ह्यपनय शरम् ।

कञ्चु० । ( तथा करोति )

राजा । ( नामाक्षराण्यनुवाच्य सापत्यतां रूपयति )

कञ्चु० । शावनियोगमशून्यं करोमि ।

[ इति निष्क्रान्तः ]

विदू० । किं भवं विआरेदि ।
किं भवान् विचारयति ।

राजा । शृणु तावत् प्रहर्तुर्नामाक्षराणि । (वाचयति)

उर्वशीसंभवस्यायमैलसूनोर्धनुर्भृतः ।
कुमारस्यायुषो बाणः संहर्तुर्द्विषदायुषाम् ॥[१]

---

विद्धदेहः अपराधोचितम् अपराधस्य उचितमर्हम्[२] । मरणमित्यर्थः । प्राप्य समौलिरत्नः मौलिरत्नसहितः अन्तरिक्षात् पतितः ॥६॥

उर्वशीसंभवस्येति । उर्वशीसंभवस्य उर्वशीजातस्य ऐलसूनोः इलाया अपत्यमैलः पुरूरवाः तस्य सूनोः पुत्रस्य धनुर्भृतो धानुष्कस्य द्विषदायुषां संहर्तुः आयुषः आयुःसंज्ञकस्य कुमारस्यायं बाणः ॥७॥

---

१ प्रहर्तुरिति श्रीपाण्डुरङ्गप्रभृतीनां पाठः परं नैष साधुः । प्रपूर्वो हि हरतिराहननेर्थे निरूढः । लोपनं विच्छेदनं वा नास्यार्थः । न ह्यायुः प्रहरतीति शास्त्रे लोके वा क्वचिच्छ्रूयते । अतोस्माभिष्टीकाकृतः पाठोङ्गीकृतः ।

२ उचितमर्हणमित्यर्थः—ग. श्रीपाण्डुरङ्गेणास्यासाधुत्वं नाशङ्कीति चित्रम ।

विदू० । (सपरितोषम्) दिट्ठिआ संताणेण वड्ढदि भवं ।
दिष्ट्या संतानेन वर्धते भवान् ।

राजा । सखे कथमेतत् । अन्यत्र नैमिषेयसत्त्राद्वियुक्तोऽहमुर्वश्या । न च मया गर्भव्यक्तिरालक्षिता । कुत एव प्रसूतिः । किं तु ।

आविलपयोधराग्रं
लवलीदलपाण्डुराननच्छायम् ।
तानि दिनानि वपुरभूत्
केवलमलसेक्षणं तस्याः ॥८॥

विदू० । मा भवं सव्वं माणुसी-धम्मं दिव्वासु संभावेदु ।
मा भवान् सर्वं मानुषीधर्मं दिव्यासु संभावयतु ।
पहाव-णिगूढाइं ताणं चरिदाइं ।
प्रभावनिगूढानि तासां चरितानि ।

राजा । अस्तु तावदेवं यथा भवानाह । पुत्रसंवरणे किमिव कारणं तत्रभवत्याः ।

विदू० । को देवता-रहस्साइं तक्कइस्सदि ।
को देवतारहस्यानि तर्कयिष्यति ।

( प्रविश्य कञ्चुकी )

कञ्चु० । जयतु जयतु देवः । देव च्यवनाश्रमात् कुमारं गृहीत्वा तापसी संप्राप्ता देवं द्रष्टुमिच्छति ।

राजा । उभयमपि अविलम्बितं प्रवेशय ।

---

आविलपयोधराग्रमित्यादि । तस्या वपुः शरीरं कानिचिद्दिनानि कतिपयानि दिवसानि केवलम्, आविलपयोधराग्रं कलुषचूचुकं, लवलीदलपाण्डुराननच्छायं लवली लताविशेषः तस्या दलवत् पाण्डुरा आननच्छाया मुखकान्तिः यस्य तत्तथोक्तम् अलसेक्षणं चाभूत् ॥८॥

पुत्रसंवरणे पुत्रगोपने ।

कञ्चु० । यदाज्ञापयति देवः ।

( इति निष्क्रम्य चापहस्तेन कुमारेण तापस्या च सह प्रविष्टः )

कञ्चु० । इत इतो भवती । ( सर्वे परिक्रामन्ति )

विदू० । ( विलोक्य ) किं ण खु सो एसो तत्तभवं खत्तिअ-
किं न खलु स एष तत्रभवान् क्षत्रिय-
कुमारओ जस्स णामङ्किदो गिध्ध-लख्ख-वेधी अध्ध-
कुमारको यस्य नामाङ्कितो गृध्रलक्षवेधी अर्ध-
णाराओ । तह बहुअरं भवन्तं अणुकरेदि ।
नाराचः । तथा बहुतरं भवन्तमनुकरोति ।

राजा । स्यादेवम् । अतः खलु

बाष्पायते निपतिता मम दृष्टिरस्मिन्
वात्सल्यबन्धि हृदयं मनसः प्रसादः[1] ।
संजातवेपथुभिरुज्झितधैर्यवृत्ति-
रिच्छामि चैनमदयं परिरब्धुमङ्गैः ॥६॥

कञ्चु० । भगवति एवं स्थीयताम् ।

( तापसीकुमारौ स्थितौ )

राजा । अम्ब अभिवादये ।

तापसी । महाभाअ सोम-वंस-विथ्थारइत्तओ होहि । (आत्मगतम्)
महाभाग सोमवंशविस्तारयिता भव ।
अम्हो अणाचख्खिदोवि विण्णादो इमस्स राएसिणो
अहो अनाख्यातोपि विज्ञातः अस्य राजर्षेः

---

बाष्पायत इत्यादि । अस्मिन्निपतिता मम दृष्टिः चक्षुः बाष्पायते बाष्पमश्रु उद्वमति । बाष्पोष्मभ्यामुद्वमने इति क्यङ् । हृदयं मनः वात्सल्यस्य प्रेम्णः बन्धोऽस्यास्तीति तत्तथोक्तम् । तादृशं सत् प्रसादं प्रसन्नतां वहति प्राप्नोति । उज्झितधैर्यवृत्तिः उज्झिता त्यक्ता धैर्यस्य वृत्तिर्वर्त्तनं येन स तथोक्तः, संजातवेपथुभिः जातकम्पैः अङ्गैरवयवैः एनं कुमारम् अदयं निर्दयम् । गाढमित्यर्थः । परिरब्धुमालिङ्गितुमिच्छामि अभिलषामि ॥६॥

---

[1] वहति प्रसादम्—इति टीकाकृत्पठतीति भाति ।

आउस्स अ ओरसो संबन्धो । (प्रकाशम्) जाद पणाम
आयुषश्चौरसः सम्बन्धः । जात प्रणाम
दे गुरुं ।
ते गुरुम् ।

कुमारः । (चापगर्भमञ्जलिं करोति)

राजा । आयुष्मान् भव ।

कुमा० । (आत्मगतम्)

यदि हार्दमिदं श्रुत्वा
पिता ममायं सुतोहमस्येति ।
उत्सङ्गवर्धितानां
गुरुषु भवेत् कीदृशः स्नेहः ॥१०॥

राजा । भगवति किमागमनप्रयोजनम् ।

ताप० । सुणादु महाराओ । एसो दीहाऊ आऊ जादमेत्तो एव्व
शृणोतु महाराजः । एष दीर्घायुरायुर्जातमात्र एव
उव्वसीए किंवि णिमित्तं अवेक्खिअ मम हत्थे
उर्वश्या किमपि निमित्तम् अवेक्ष्य मम हस्ते
णासी-किदो । जं खत्तिअ-कुमारअस्स जाद-कम्मादि
न्यासीकृतः । यत् क्षत्रियकुमारस्य जातकर्मादि
विहाणं तं से भअवदा चवणेण असेसं अणुचिट्ठिदं ।
विधानं तदस्य भगवता च्यवनेन अशेषमनुष्ठितम् ।
गहिद-विज्जो धणुव्वेदे अहिविणीदो ।
गृहीतविद्यो धनुर्वेदे ऽभिविनीतः ।

राजा । सनाथः खलु संवृत्तः ।

---

यदि हार्दमित्यादि । ममायं पिता अहमस्य सुत इति श्रुत्वा यदि यस्मात्कारणात् इदं हार्दं प्रेम भवति तस्मादुत्सङ्गवर्धितानां अङ्कपरिवर्धितानां पुत्राणां गुरुषु पितृषु कीदृशः किंविधः स्नेहो भवेत् ॥१०॥

तापः । अज्ज पुप्फ-समिदत्थं इसि-कुमारएहिं सह गदेण इमिणा
अद्य पुष्पसमिदर्थम् ऋषिकुमारकैः सह गतेनानेन
अस्सम-विरुध्धं आअरिदं ।
आश्रमविरुद्धमाचरितम् ।

विदू० । (सावेगम्) किं विअ ।
किमिव

तापः । गहिदामिसो किल गिध्धो पादव-सिहरे णिलीअमाणो
गृहीतामिषः किल गृध्रः पादपशिखरे निलीयमानः
अणेण लक्खी-किदो बाणस्स ।
अनेन लक्षीकृतो बाणस्य ।

विदू० । (राजानमवलोकयति)

राजा । ततस्तः ।

तापः । तदो उवलध्ध-उत्तन्तेण भअवदा चवणेण अहं
तत उपलब्धवृत्तान्तेन भगवता च्यवनेन अहं
समादिट्ठा । णिज्जादेहि हथ्थ-णासंति । ता इच्छामि
समादिष्टा । निर्यातय हस्तन्यासमिति । तदिच्छामि
देविं उव्वसिं पेक्खिदुं ।
देवीमुर्वशीं [1]द्रष्टुम् ।

राजा । तेन हि आसनमनुगृह्णातु भगवती ।

तापः । (उपनीत आसने उपविशति)

राजा । लातव्य आहूयतामुर्वशी ।

---

निर्यातनं न्यासार्पणम् । निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च इत्यमरः । लातव्य आहूयतामुर्वशीत्यत्र [2]बीजस्योर्वश्या अनुसन्धानात्सन्धिर्नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ प्रेचितुम्—इति पाण्डुरङ्गाश्रिता च्छाया । प्रकृते प्रोपसृष्टस्येक्षतेः प्रयोगो न व्यवहारानुपातीति नागोचरं विदुषाम् ।

२ बीजरूपस्यो०—कोशः ।

कञ्चु० । यदाज्ञापयति देवः ।

[इति निष्क्रान्तः]

राजा । (कुमारमवलोक्य) एह्येहि वत्स ।

सर्वाङ्गीणः स्पर्शः
सुतस्य किल तेन मामुपगतेन ।
आह्लादयस्व ताव-
च्चन्द्रकरश्चन्द्रकान्तमिव ॥११॥

ताप० । जाद आणन्देहि पिदरं ।
जात आनन्दय पितरम् ।

कुमा० । (राजानमुपगम्य पादग्रहणं करोति)

राजा । (कुमारं परिष्वज्य पादपीठे चोपवेश्य) वत्स इतस्तव पितुः प्रियसखं ब्राह्मणमशङ्कितो वन्दस्व ।

विदू० । किंति साङ्किस्सदि । [१]अस्सम-वास-परिचिदो [२]ऐव्व
किमिति शङ्किष्यते । आश्रमवासपरिचित एव
साहामिओ ।
शाखामृगः ।

कुमा० । (सस्मितम्) तात वन्दे ।

विदू० । सत्थि भवदो
स्वस्ति भवते ।

---

सर्वाङ्गीण इत्यादि । सुतस्य पुत्रस्य स्पर्शः । अत्र स्पर्शशब्देन [३]स्पर्शसुखं लक्ष्यते । सर्वाङ्गीणः सर्वाङ्गव्यापी किल । तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति इति खः । तेन कारणेन उपगतेन उपगमनेन । उपश्लेषेणेत्यर्थः । मां प्रह्लादयस्व आनन्दय । तावदिति साकल्ये । अत्रोपमामाह—चन्द्रकरः चन्द्रकिरणः चन्द्रकान्तमिव ॥ ११ ॥

जात वत्स ।

---

१ अतः पूर्वं एं इत्यधिकम्—टीका.

२ अतः परं से इत्यधिकम्—टीका.

३ सुखं—क.

( ततः प्रविशति उर्वशी कञ्चुकी च )

कञ्चु० । इत इतो देवी ।

उर्व० । ( कुमारमवलोक्य ) को णु खु एसो स-वाणासणो पाद-
को नु खल्वेष सबाणासनः पाद-
पीठोवविठ्ठो सअं महाराएण संजमीअमाण-सिहण्डओ
पीठोपविष्टः स्वयं महाराजेन संयम्यमान-शिखण्डकः
चिठ्ठदि । ( तापसीं दृष्ट्वा ) अम्मो सच्चवदीसूइदो मे
तिष्ठति । अहो सत्यवतीसूचितो मम
पुत्तओ आऊ । महन्तो खु संवुत्तो । ( परिक्रामति )
पुत्रक आयुः । महान् खलु संवृत्तः ।

राजा । ( उर्वशीं दृष्ट्वा )

इयं ते जननी प्राप्ता त्वदालोकनतत्परा ।
स्नेहप्रस्नवनिर्भिन्नमुद्वहन्ती स्तनांशुकम्[२] ॥१२॥

ताप० । जाद एहि पच्चुग्गच्छ मादरं ।
जात एहि प्रत्युद्गच्छ मातरम् ।

कुमा० । ( उर्वशीं प्रत्युद्गच्छति ) ।

उर्व० । अम्ब पादपणामं करेमि[३] ।
अम्ब पादप्रणामं करोमि ।

---

तिष्ठति । अत्र कार्यमार्गणाद्विबोधो नाम सन्ध्यङ्गमुक्तं भवति । महान् खलु संवृत्तः । अत्र तस्य कार्यस्य निबन्धनाद् ग्रन्थनं नाम सन्ध्यङ्गमुक्तं भवति ।

इयं ते जननीत्यादि । स्पष्टोर्थः ।

---

१ पादपीठे—इति पाण्डुरङ्गधृतः पाठः । अयमसाधुः । तिष्ठतिना गतिनिरोध एवोच्यते उपवेशनं चात्र विवक्षितम् । नाथोप्यत्रास्माकमनुकूलः ।

२ अत्र श्लोके नाथः—

इयमिति । आलोकनतत्परा विलोकनैकताना । स्नेहेन प्रेम्णा प्रस्नवः क्षरत्पयः । तेन नितरां भिन्नं संगतम् । आर्द्रीभूतमिति यावत् ।

भिन्नं वाच्यवदत्यर्थे दारिते संगते स्फुटे ।

३ एसो वन्दणं—टीका ।

तापः । वच्छे भत्तुणो बहुमदा होहि ।
वत्से भर्तुर्बहुमता भव ।

कुमा० । अम्ब अभिवादये ।

उर्व० । (कुमारमुन्नमितमुखं परिष्वज्य) वच्छ पिदरं आराधइत्तओ
वत्स पितरम् आराधयिता
होहि । (राजानमुपेत्य) जेदु जेदु महाराओ ।
भव । जयतु जयतु महाराजः ।

राजा । स्वागतं पुत्रवत्यै । इत आस्यताम् । (अर्धासनं ददाति)

उर्व० । (उपविशति)

(सर्वे यथोचितमुपविशन्ति)

तापः । एसो गहिद-विज्जो आऊ संपदं कवअ-हरो संवुत्तो ।
एष गृहीतविद्य आयुः सांप्रतं कवचहरः संवृत्तः ।
ता एदस्स दे भत्तुणो समक्खं णिआदिदो हत्थ-
तद् एतस्य ते भर्तुः समक्षं निर्यातितो हस्त-
णिक्खेवो । ता अत्ताणं विसज्जेदुं इच्छामि[1] ।
निक्षेपः । तद् आत्मानं विसर्जयितुम् इच्छामि ।
उवरुज्झइ मे अस्समधम्मो ।
उपरुध्यते मम आश्रमधर्मः ।

उर्व० । चिरस्स अज्जं दक्खिअ अहिअदरं अविदित्तण्हम्हि[2] । ण[3]
चिरस्यार्यां दृष्ट्वा अधिकतरम् अवितृष्णास्मि । न
सक्कुणोमि विसज्जिदुं । अण्णय्यं उवरोहिदुं ।
शक्नोमि विस्रष्टुम् । अन्याय्यम् उपरोद्धुम् ।

---

निर्यातितः प्रत्यर्पितः । अत्रानुभूतार्थकथनान्निर्णयो नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ इति नाधरत् पाण्डुरङ्गः । अत्र कर्मणि तुमुन्निति भुवन्बह्वभमीत् स विशः ।
२ अवितिण्हं ह्मिअं—टीका.
३ ण—उवरोहिदुं इत्यस्य स्थाने ण जुत्तादि उण अस्समधम्मं उवरोहिदुं—टीका.

गच्छदु अज्जा पुणो दंसणाअ ।
गच्छत्वार्या पुनर्दर्शनाय ।

राजा । अम्ब भगवते च्यवनाय मां प्रणिपातय ।

ताप० । एव्वं भोदु ।
एवं भवतु ।

कुमा० । आर्ये सत्यं यदि निवर्तसे मामपि आश्रमं नेतुमर्हसि ।

राजा । अयि वत्स उषितं त्वया पूर्वस्मिन्नाश्रमे । द्वितीयमध्यासितुं तव समयः ।

ताप० । जाद गुरुणो वअणं अणुचिट्ठ ।
जात गुरोर्वचनम् अनुतिष्ठ ।

कुमा० । तेन हि

यः सुप्तवान् मदङ्के
शिखण्डकण्डूयनोपलब्धसुखः ।
तं मे जातकलापं
प्रेषय मणिकण्ठकं शिखिनम् ॥१३॥

ताप० । ( विहस्य ) एव्वं करेमि । सत्थि भोदु तुम्हाणं ।
एवं करोमि । स्वस्ति भवतु युष्मभ्यम् ।

( इति निष्क्रान्ता )

राजा । कल्याणि

अद्याहं पुत्रिणामग्र्यः सत्पुत्रेणामुना तव ।
पौलोमीसंभवेनेव जयन्तेन पुरंदरः ॥१४॥

उर्व० । ( स्मृत्वा रोदिति )

---

यः सुप्तवानित्यादि । मणिकण्ठो नाम तस्य मयूरस्य संज्ञा ।
अहं हीत्यादि । स्पष्टोऽर्थः ।

---

१ अहं हि—इति टीकाकृत्पठतीति भाति ।

विदू० । किं णु खु तत्तहोदी एक्क-वदे अस्सु-मुही संवुत्ता ।[1]
　　किं नु खलु तत्रभवती एकपदे अश्रुमुखी संवृत्ता ।

राजा । ( सावेगम् )

किं सुन्दरि प्ररुदितासि ममोपपन्ने
　　वंशस्थितेरधिगमान्महति प्रमोदे ।
पीनोन्नतस्तनविसर्पिभिरानयन्ती
　　मुक्तावलीविरचनापुनरुक्तिमस्रैः ॥१५॥

( बाष्पमस्याः प्रमार्ष्टि )

उर्व० । सुणादु महाराओ । पढमं उण पुत्त-दंसणेण
　　श्रृणोतु महाराजः । प्रथमं पुनः पुत्रदर्शनेन
　　विसुमरिदम्हि । दाणिं महिन्द-संकित्तणेण समओ
　　विस्मृतास्मि । इदानीं महेन्द्रसंकीर्तनेन समयो
　　मह हिअअं आआसेदि ।[2]
　　मम हृदयम् आयासयति ।

राजा । कथ्यतां समयः ।

उर्व० । अहं पुरा महाराअ-गहिद-हिअआ[3] महिन्देण आणत्ता—
　　अहं पुरा महाराजगृहीतहृदया महेन्द्रेण आज्ञापिता—

राजा । किमिति ।

उर्व० । जदा एसो मम पिअ-सहो राएसी तुइ समुप्पण्णस्स
　　यदा एष मम प्रियसखो राजर्षिः त्वयि समुत्पन्नस्य

---

किं सुन्दरीत्यादि । वंशस्थितेः कुलप्रतिष्ठायाः अधिगमात्प्राप्तेः । पुत्रलाभादित्यर्थः । महति प्रमोदे प्रसक्ते सति किं किमर्थं प्ररुदितासि रोदितुं प्रक्रान्ता भवसि । आदिकर्मणि क्तः कर्तरि चेति क्तः ॥१५॥

अस्या उर्वश्याः बाष्पमश्रु प्रमार्ष्टि अपनयति । अत्र पर्युपासनात्प्रसादो नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ अस्सुपुण्णमुही—टीका.

२ ओदरिदो ( अवतीर्णः )—टीका ।

३ ०गद०—टीका ।

वंस-करस्स मुहं पेक्खिस्ससि तदा तुए भूओवि मम
वंशकरस्य मुखं द्रक्ष्यति तदा त्वया भूयोपि मम
समीवं आअन्तव्वंति । तदो मए महाराअ-विओअ-
समीपम् आगन्तव्यमिति । ततो मया महाराजवियोग-
भीरुदाए जाद-मेत्तो एव्व विज्जा[1]गम-णिमित्तं भअवदो
भीरुतया जातमात्र एव विद्यागमनिमित्तं भगवत-
चवणस्स अस्सम-पदे अज्जाए सच्चवदीए हत्थे
श्च्यवनस्य आश्रमपदे आर्यायाः सत्यवत्या हस्ते
अप्पआसं णिक्खित्तो । अज्ज पिदुणो आराहण-
अप्रकाशं निक्षिप्तः । अद्य पितुराराधन-
समत्थो संवुत्तोत्ति कलअन्तीए णिज्जादिदो मे
समर्थः संवृत्त इति कलयन्त्या निर्यातितो मे
दीहाऊ। ता एत्तिओ मे महाराएण संवासो ।
दीर्घायुः । तद् एतावान् मे महाराजेन संवासः ।

( सर्वे विषादं रूपयन्ति )

राजा । (सनिश्वासम्) अहो सुखप्रत्यर्थिता दैवस्य ।

[2]आश्वासितस्य मम नाम सुतोपलब्ध्या
सद्यस्त्वया सह कृशोदरि विप्रयोगः ।
व्यावर्तितातपरुजः प्रथमाभ्रवृष्ट्या
वृक्षस्य वैद्युत इवाग्निरुपस्थितोयम् ॥१६॥

---

तस्मादेतावान्मे महाराजेन सह संवासः । अत्र मिथो जल्पनात्परिभाषा नाम सन्ध्यङ्गमुक्तं भवति ।

आश्वासितस्येत्यादि । स्पष्टोर्थः ।

---

१ विज्जाहिगम०—टीका ।

२ आश्वासितस्य कृतसमाधानस्य । नामेति प्रकाशे इति नाथः ।

विदू० । अअं सो अत्थो अणत्थाणुबन्धो संवुत्तो । संपदं
अयं सोऽर्थः अनर्थानुबन्धः संवृत्तः । सांप्रतं
तक्केमि तत्तभवदा वक्कलं गेण्हिअ तवो-वणं
तर्कयामि तत्रभवता वल्कलं गृहीत्वा तपोवनं
गन्दव्वंति ।
गन्तव्यमिति ।

उर्व० । मंपि मन्द-भाइणिं किद-विणअस्स पुत्तस्स लाभाणन्तरं
मामपि मन्दभागिनीं कृतविनयस्य पुत्रस्य लाभानन्तरं
सग्गारोहणेण[1] अवसिद-कज्जं[2] महाराओ समत्थइस्सदि[3] ।
स्वर्गारोहणेन अवसितकार्यां महाराजः समर्थयिष्यते ।

राजा । मा मैवम् ।

न हि सुलभवियोगा कर्तुमात्मप्रियाणि
प्रभवति परवत्ता शासने तिष्ठ भर्तुः ।
अहमपि तव सूनावायुषि न्यस्तराज्यो
विचरितमृगयूथान्याश्रयिष्ये वनानि ॥१७॥

कुमा० । नार्हति तातः पुंगवधौरितायां[4] धुरि दम्यं नियोजयितुम् ।

राजा । अयि वत्स

---

महाराजः समर्थयिष्यते। गतेषु कार्येषु यथा शोको नास्ति तथा मयि गतायामपि शोको न भविष्यतीत्यभिप्रायः ।

न हि सुलभवियोगेत्यादि । स्पष्टोर्थः ।

पुङ्गवधार्यायां पुङ्गवेन महोक्षेण धार्यायां धारयितुमर्हायां धुरि भारे दम्यं वत्सतरं नियोजयितुं नियन्तुम् ।

---

१ सग्गारोहणे—टीका ।

२ कज्जणिव्विसेसं—टीका ।

३ समत्थेदि इति पाण्डुरङ्गधृतः पाठोऽशोभनः ।

४ धार्यायां—टीका.

शमयति गजानन्यान् गन्धद्विपः कलभोपि सन्
भवति सुतरां वेगोदग्रं भुजङ्गशिशोर्विषम् ।
भुवमधिपतिर्बालावस्थोप्यलं परिरक्षितुं
न खलु वयसा जात्यैवायं स्वकार्यसहो भरः ॥१८

तातव्य मद्वचनादमात्यपरिषदं ब्रूहि संभ्रियतामायुषो राज्याभिषेक इति ।

कञ्चु० । यदाज्ञापयति देवः ।

[ इति दुःखितो निष्क्रान्तः ।

( सर्वे दृष्टिप्रविघातं रूपयन्ति )

राजा । ( आकाशमवलोक्य ) किं नु खलु निरभ्रे विद्युत्संपातः ।

उर्व० । ( विलोक्य ) अम्मो भअवं णारदो ।

अहो भगवान् नारदः ।

राजा । अये भगवान् नारदः । य एषः

---

शमयतीत्यादि । गन्धद्विपः विशिष्टजातिर्गजः कलभः शिशुस्सन्नपि अन्यान् गजान् इतरजातिगजान् शमयति वारयति । भुजङ्गशिशोर्विषं सुतरामत्यर्थं वेगोदग्रं उद्रेकेण उदग्रमधिकं भवति । दष्टानामिति शेषः । अधिपती राजा बाल्यावस्थोऽपि बाल्यमवस्था यस्य स तथोक्तः तथाविधः सन्नपि भुवं परिरक्षितुम् अलं शक्नोति । अर्थान्तरन्यासमाह—अयं भर एषोऽतिशयः । अतिशयो भर इत्यमरः । जात्यैव जन्मनैव स्वकार्यसहः आत्मकार्यक्षमो भवति । वयसा तारुण्येन न खलु न हि । स्वकार्यसहो न भवतीत्यर्थः ॥[1] १८॥

किन्तु खल्वित्यत्र अद्भुतार्थप्राप्तेरुपगूहनं नाम सन्ध्यङ्गमुक्तं भवति ।

---

१ अत्र श्लोके रङ्गनाथव्याख्या संक्षिप्य लिख्यते—

गन्धद्विपो गन्धगजः कलभो बालोपि सन्नन्यान्गजान्शमयति परिभवति । वेगैः धातोर्धात्वन्तरप्राप्तिर्विषवेग इति स्मृतः' इति वचनोक्तैर्विषवेगैरुदग्रं क्रूरम् । भुजङ्गशिशोर्विषं गरलं प्रभवति मारणसमर्थं भवति । धातवश्च सप्त । उक्तं वाग्भटादौ— रसासृङ्मांसमेदोस्थिमज्जशुक्राणि धातव इति ।

गोरोचनानिकषपिङ्गजटाकलापः
संलक्ष्यते शशिकलामलवीतसूत्रः।
मुक्तागुणातिशयसंभृतमण्डनश्री-
र्हैमप्ररोह इव जङ्गमकल्पवृक्षः ॥१६॥

अर्घ्यमस्मै।

उर्व०। (यथोक्तमादाय) इअं भअवदे अरिहणा।
इयं भगवतेऽर्हणा।

(ततः प्रविशति नारदः)

नारदः। विजयतां मध्यमलोकपालः।

राजा। (उर्वशीहस्तादर्घ्यमादाय आवर्ज्य) भगवन्नभिवादये।

उर्व०। भअवं पणमामि।
भगवन् प्रणमामि।

नार०। अविरहितौ दम्पती भूयास्ताम्।

राजा। (आत्मगतम्) अपि नामैवं स्यात्। (प्रकाशम्। कुमारमाश्लिष्य) वत्स भगवन्तमभिवादयस्व।

कुमा०। भगवन्नौर्वशेय आयुः प्रणमति।

नार०। आयुष्मानेधि।

राजा। अयं विष्टरोनुगृह्यताम्।

---

गोरोचनेत्यादि। स्पष्टोर्थः[1] ॥१६॥

अविरहितावित्यादिना कार्यस्य सिद्धत्वात्कार्यं नाम पञ्चमी अर्थप्रकृति-रित्यनुसंधेयम्।

---

१ गोरोचनेत्यादिश्लोके नाथव्याख्यात्र लिख्यते—

गोरोचनाया निकषः कषः कषपाषाणः, लक्षणया तत्स्था रेखाः, तद्वत् पिङ्गो जटाकलापो जटासमूहो यस्य। शशिकलावदमलं शुभ्रं वीतसूत्रमुपवीतं यस्य। मुक्तागुणैर्मौक्तिकसरैरतिशयेनात्यन्तं संभृता कृता मण्डनश्रीर्भूषणशोभा यस्य। तथा हैमा हेमसम्बन्धिनः। सौवर्णा इत्यर्थः। प्ररोहा निजजटा यस्यैतादृशो जङ्गमकल्पवृक्ष इव संलक्ष्यते॥

नार० । ( तथोपविष्टः )

( सर्वे नारदमनूपविशन्ति )

नार० । राजन् श्रूयतां महेन्द्रसंदेशः ।

राजा । अवहितोऽस्मि ।

नार० । प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति—

राजा । किमाज्ञापयति ।

नार० । त्रिकालदर्शिभिर्मुनिभिरादिष्टः सुरासुरसंगरो भावी । भवांश्च सांयुगीनः सहायो नः । तेन त्वया न शस्त्रं संन्यस्तव्यम्[1] । इयं चोर्वशी यावदायुस्तव सहधर्मचारिणी भवत्विति ।

उर्व० । ( अपवार्य ) अम्महे सल्लं मे हिअआदो अवणीदं विअ ।
अहो शल्यं मे हृदयाद् अपनीतमिव ।

राजा । परवानस्मि देवेश्वरेण ।

नार० । युक्तम् ।

त्वत्कार्यं वासवः कुर्यात् त्वं च तस्येष्टमाचरेः ।
सूर्यः समेधयत्यग्निमग्निः सूर्यं च तेजसा ॥२०॥

---

इयं चोर्वशीत्यत्र समग्रफलसंपत्तेः फलागमो नाम पञ्चम्यवस्था दर्शिता । कार्यफलागमयोः समन्वयान्निर्वहणं नाम पञ्चमः सन्धिः ।

अम्महे इति हर्षे निपातः । शल्यं मे हृदयादपनीतम् । अत्र दुःखविनिर्गमात्समयो नाम सन्ध्यङ्गमुक्तं भवति ।

परवानस्मि देवेश्वरेण इत्यत्रेष्टार्थसिद्धेर्गम्यमानत्वादानन्दो नाम सन्ध्यङ्गमुक्तं भवति ।

त्वत्कार्यमित्यादि । सूर्यस्तेजसाग्निं समेधयति वर्धयति अग्निश्च सूर्यं तेजसा समेधयति । तस्मादग्निर्दूरान्नक्तं ददृशे इत्यादिश्रुतिप्रसिद्धम्[2] ॥२०॥

---

१ अत्रास्यतेस्तव्ये इडभावश्चिन्त्यः ।

२ अग्नितेजो हि दिने सूर्यमनुप्रविशति रात्रौ सूर्यतेजोऽग्निमिति पौराणी प्रसिद्धिः—इति नाथः ।

( आकाशमवलोक्य ) रम्भे उपनीयतां स्वयं महेन्द्रेण संभृतः कुमारस्यायुषो यौवराज्याभिषेकः ।

( प्रविष्टा यथोक्तहस्ता अप्सरसः )

अप्सरसः । भअवं इमे अभिसेअ-संभारा ।

भगवन्नेते ऽभिषेक[1]संभाराः ।

नार० । उपवेश्यतामायुष्मान् भद्रपीठे[2] ।

रम्भा । इदो वच्छ । ( कुमारमुपवेशयति )

इतो वत्स ।

नार० । (कुमारस्य शिरसि कलशमावर्ज्य) रम्भे निर्वर्त्यतां शेषो विधिः

रम्भा । ( यथोक्तं निर्वर्त्य ) वच्छ पणम भअवन्तं मादा-पिदरे अ ।

वत्स प्रणम भगवन्तं मातापितरौ च ।

कुमा० । ( यथाक्रमं प्रणमति )

नार० । स्वस्ति भवते ।

राजा । कुलधुरंधरो भव ।

उर्व० । पिदुणो आराधइत्तओ होहि ।

पितुराराधयिता भव ।

( नेपथ्ये वैतालिकौ )

प्रथमः । विजयतां युवराजः ।

अमरमुनिरिवात्रिर्ब्रह्मणोत्रेरिवेन्दु-
र्बुध इव शिशिरांशोर्बोधनस्येव देवः[3] ।

---

१ संभारो बिल्ववल्मीकमृत्तिकादिसामग्री—इति नाथः ।

२ भद्रपीठं हेमादिमयमासनम् । भद्रासनलक्षणं चोक्तं देवीपुराणे—

हैमं च राजतं ताम्रं क्षीरवृक्षमयं च वा ।
भद्रासनं प्रकर्तव्यं सार्धहस्तसमुच्छ्रितम् ॥
सपादहस्तमानं च राज्ञो माण्डलिकान्तरात् ।

३ राजा भट्टारको देवः—इत्यमरः ।

भव पितुरनुरूपस्त्वं गुणैर्लोककान्तै-
रतिशयिनि[1] समाप्ता वंश एवाशिषस्ते ॥२१॥

द्वितीयः ।

तव पितरि पुरस्तादुन्नतानां स्थितेऽस्मिन्
स्थितिमति च विभक्ता त्वय्यनाकम्प्यधैर्ये ।
अधिकतरमिदानीं राजते राज्यलक्ष्मी-
र्हिमवति जलधौ च व्यस्ततोयेव गङ्गा ॥[1]२२॥

अप्स० । ( उर्वशीमुपेत्य ) दिट्ठिआ पुत्तस्स जुव-राअ-सिरीए
दिष्ट्या पुत्रस्य युवराजश्रिया
भत्तुणो अविरहेण वड्ढसि ।
भर्तुरविरहेण वर्धसे ।

उर्व० । साहारणो एसो अब्भुदओ । (कुमारं हस्ते गृहीत्वा) एहि
साधारण एषो ऽभ्युदयः । एहि
वच्छ जेट्ठ-मादरं अभिवन्देहि ।
वत्स ज्येष्ठमातरम् अभिवन्दस्व ।

कुमा० । ( प्रतिष्ठते )

राजा । तिष्ठ । सम्भमेव तत्रभवत्याः समीपं यास्यामस्तावत् ।

नार० । आयुषो यौवराज्यश्रीः स्मारयत्यात्मजस्य ते ।
अभिषिक्तं महासेनं सैनापत्ये मरुत्वता ॥२३॥

---

अमरमुनिरित्यादि । स्पष्टोर्थः ।

तव पितरीत्यादि । स्पष्टोर्थः ।

दिष्ट्या पुत्रस्य । अत्र लब्धार्थस्य स्थिरीकरणात् कृतिरिति सन्ध्यङ्ग-मुक्तं भवति ।

आयुष इत्यादि । स्पष्टोर्थः ।

---

१ अतिशयिनि सर्वोत्कर्षशालिनि । उन्नतानां महताम् । स्थितिमति मर्यादायुक्ते । अनाकम्प्यधैर्येऽनुच्छेद्यचेतःस्थैर्यशालिनि इति सर्वत्र नाथः ।

राजा । एवमनुगृहीतो भगवता कथं न योग्यो भविष्यति ।

नार० । किं ते भूयः पाकशासनः प्रियं करोतु ।

राजा । यदि मे मघवा प्रसन्नः किमतः परमिच्छामि । तथापीदमस्तु ।

( भरतवाक्यम् )

परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
संगतं श्रीसरस्वत्योर्भूतयेस्तु सदा सताम् ॥२४॥

[ इति निष्क्रान्ताः सर्वे ]

इति विक्रमोर्वशीये नाटके पञ्चमोऽङ्कः ।

समाप्तमिदं विक्रमोर्वशीयं नाटकम् ॥

---

एवमत्रानुगृहीतो मघवता कथमसौ न पूज्यो भविष्यतीत्यत्र वरस्य गम्यमानत्वादुपसंहारो नाम सन्ध्यङ्गमुक्तं भवति ।

परस्परेत्यादि । परस्परविरोधिन्योरन्योन्यद्वेषिण्योः श्रीसरस्वत्योः लक्ष्मीभारत्योः एकसंश्रयदुर्लभम् एकस्मिन् संश्रये आश्रये दुर्लभमलभ्यं संगतं संगमः सतां सज्जनानां भूतये ऐश्वर्याय सदा सर्वदा अस्तु वियताम् । अत्र शुभशंसनात् प्रशस्तिर्नाम सन्ध्यङ्गमुक्तं भवति ॥२४॥

[ इति निष्क्रान्ताः सर्वे ]

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये
विक्रमोर्वशीयव्याख्याने
पञ्चमोऽङ्कः ॥

---

१ मघवता कथमसौ न पूज्य इति टीकाकृत्पठति ।

# श्लोक-सूची ।

# NOTES.

## ACT I.

Sl. 1.—वेदान्तेषु—In the Upanisads (which form an end of the Vedas whether chronologically or in point of the subject-matter). The Metaphysics of the Vedas are held to have reached their culmination in the Upanisads. एकपुरुषम्—One pervading soul. पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा—Nirukta II. रोदसी—The heaven and the earth. It is dual of रोदस् n. which is also an indeclinable according to Ksirasvamin. रोदसी is also a feminine word ending in ई the dual of which is रोदस्यौ. भूद्यावौ रोदस्यौ रोदसी च ते—Amara. ईश्वरः—Literally ruler (ईशनशीलः, ईशिता). To ईश् to rule, to be master of, is added a suffix वर (वरच्) in the sense of 'one who does a thing as a matter of wont, one who is capable of doing it.' We have similar formations in भास्वर (radiant), विकस्वर (blooming), स्थावर (stationary), etc. अनन्यविषयः—अविद्यमानोऽन्यो विषयो ऽस्य, not expressive of anybody else. Cp. Raghu:—

> हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः ।
> तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ॥ ३. ४९ ॥

In the classical Sanskrit literature, the word ईश्वर or ईशान was almost restricted to Siva. यथार्थाक्षरः—यथार्थम् अक्षराणि यस्य, अर्थमनतिक्रम्य वर्तत इति यथार्थम् Indeclinable comp. Siva is significantly Isvara, for he is possessed of super-human power such as अणिमा, लघिमा, गरिमा etc. attributed to perfected yogins. मुमुक्षुभिः—मोक्तुमिच्छुभिः, by those desirous of liberation from transmigration. प्राणादिभिः—प्राणादयः प्राणापानसमानव्यानोदानाः, the five vital airs, named according to their different functions. The following couplet gives the places of their functioning:—

> हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
> उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥

स्थाणुः—Lit. stationary, abiding. For the reason given in the Puranas for this name of Siva, see Sanskrit foot-notes. स्थाणु is one of the many appellations of Siva. स्थाणू रुद्र उमापतिः—Amara. स्थणु also means a post or a pillar (e. g. किं स्थाणुरयमुत पुरुषः) and

also a branchless trunk. स्थिरभक्तियोगसुलभः—It may be interpreted as accessible by constant devotion and meditation. It is differently analysed by the commentators. स्थिरो भक्तियोगो (भक्तिप्राप्तिः) येषां ते, तैः सुलभः accessible by those who have come to have firm devotion. Ranganatha analyses it variously – (i) स्थिरो भक्तियोगो भक्तिप्राप्तिः, तया सुलभः. According to him, the expression भक्तियोग is suggestive of the fact that devotion to Siva is also a reward for merits stored up in many a previous birth. (ii) स्थिरा भक्तिर्योगो ध्यानं च, ताभ्यां सुलभः. We have accepted this analysis and rendered the expression accordingly. योग is defined thus :—

